॥ श्री वीतरागाय नमः ॥

श्री जैनाचार्य-जैनधर्मदिवाकर पूज्य श्रीघासीलाल व्रतिविरचितं

प्रमेयबोधिन्याख्यया व्याख्यया समलङ्कृतम्

हीन्दि-गुर्जर भाषानुवादसहितम्

॥ श्री-प्रज्ञापनासूत्रम् ॥

(प्रथमो भागः)

मङ्गलाचरणम्

(अनुष्टुप् छन्दः)

केवलज्ञानसम्पन्नो, लोकालोकप्रकाशकः ।
सिद्धार्थः सिद्धार्थपुत्रोऽजीनो जीयाज्जिनः सदा ॥१॥

आर्या छन्दः

ज्ञानक्रियाराधकः षड्भक्तैकविंशति वर्षपारणः ।
विशुद्धक्रियायुक्तो विषमपरीषहोपसर्गे सोढा ॥२॥
उत्कृष्टया क्रिययाऽत्र जैनशासनप्रदीपनो भव्यः ।
शासनोद्धारधुरीण-हुकुमचन्द्रमुनिवरो जीयात् ॥३॥

मंगलाचरण

१ जो केवलज्ञान से युक्त हैं, लोक और अलोक को प्रकाशित करने वाले है, जिनके समस्त प्रयोजन सिद्ध हो चुके है और सिद्धार्थ नामक राजा के पुत्र हैं, ऐसे जिनेन्द्र भगवान् महावीर सदा जयवन्त हों।

२-३ ज्ञान और क्रिया के आराधक, इक्कीस वर्ष तक बेले-बेले पारणा करने वाले, अतीव शुद्ध क्रियावान्, कठिन परीषह और उपसर्ग को सहन करने वाले, अपनी उत्कृष्ट क्रिया से जैन शासन को दिपाने वाले, भव्य तथा शासनोद्धार की धुरा को धारण करने वाले

મંગલાચરણ

૧ જેઓ કેવલ જ્ઞાનવાળા છે, લોક અને અલોકને પ્રકાશિત કરનારા છે, જેમનાં બધા પ્રયોજનો સિદ્ધ થઇ ચૂકયાં છે અને જેઓ સિદ્ધાર્થ નામના રાજાના પુત્ર છે. એવા શ્રી સિદ્ધાર્થ ભગવાન મહાવીર સદા વિજયવન્ત હો.

૨-૩ જ્ઞાન અને ક્રિયાના આરાધક એકવીસ વર્ષ સુધી બે બે ઉપવાસે પારણા કરવાવાળા, અત્યન્ત શુદ્ધ ક્રિયાવાળા, કઠણ પરીષહો અને ઉપસર્ગોને સહન કરવાવાળા, પોતાની ઉત્કૃષ્ટ ક્રિયાથી જૈન શાસનને દિપાવવાવાળા, ભવ્ય, તેમજ શાસનની ધુસરીને ધારણ કરવાવાળા મુનિવર અર્થાત્ આચાર્ય શ્રી

(अनुष्टुप् छन्दः)

तत्त्वविशारदो ज्ञानी, षट्कायप्रतिपालकः ।
ब्रह्मचर्यस्य गुप्तश्च, नवधा गुप्तिधारकः ॥४॥
एकादशाङ्गतत्त्वस्य गणिपीठकधारकः ।
ज्ञानक्रिया विशुद्ध्या च स्वात्मकाञ्चन शोधकः ॥५॥
वैराग्यदीप्तिदीप्तात्मा दीक्षाशिक्षा परायणः ।
तत्पट्टाधिष्ठिताचार्यः शिवलाल महामुनिः ॥६॥
ज्ञानध्यानतपस्त्याग-दयावैराग्यकर्मणाम् ।
सत्यचारित्रधर्माणां सर्वदोदयकारकः ॥७॥
तत्पट्टस्थानमापन्नः पाखण्डमानमर्दकः ।
विराजतां महाराज, आचार्योदयसागरः ॥८॥

मुनिवर अर्थात् आचार्य श्री हुकमचन्द्रजी महाराज जयवन्त हो ।

४ तत्त्व में निष्णात, ज्ञानवान्, षट्काय के प्रतिपालक, ब्रह्मचर्य की नौ वाडों को धारण करने वाले, गुप्तिसम्पन्न–

५ ग्यारह अंग, जो गणिपिटक अर्थात् आचार्य की पेटी कहलाते हैं, उनके धारक तथा ज्ञान और क्रिया की विशुद्धि से अपने आत्मा-रूपी काञ्चन को शुद्ध करने वाले–

६ वैराग्य के तेज से तेजस्वी आत्मा वाले, दीक्षा और शिक्षा में तत्पर श्री शिवलालजी महामुनि आचार्य श्री हुकुमचन्द्रजी महाराज के पट्ट पर आसीन हुए ।

७ ज्ञान, ध्यान, तप, त्याग, दया, वैराग्य रूप क्रियाओं के तथा सत्य, चारित्र, और श्रमण धर्मों का सदैव उदय करने वाले–

હુકુમચન્દ્રજી મહારાજ જયવન્ત હો.

૪ તત્ત્વમાં નિષ્ણાત, જ્ઞાનસંપન્ન, ષટ્કાયના પ્રતિપાલક, બ્રહ્મચર્યની નવ વાડોને ધારણ કરવાવાળા, ગુપ્તિયુક્ત–

૫ અગીયાર અંગ, જે ગણિપિટક અર્થાત્ આચાર્યની પેટી કહેવાય છે તેને ધારણ કરનાર તેમજ જ્ઞાન અને ક્રિયાની વિશુદ્ધિથી પોતાના આત્મા રૂપી કાંચનને શુદ્ધ કરવાવાળા–

૬ વૈરાગ્યના તેજથી તેજસ્વી આત્માવાળા, દીક્ષા અને શિક્ષામાં તત્પર એવા શ્રી શિવલાલજી આચાર્ય શ્રી હુકુમચન્દ્રજી મહારાજના પટ્ટ પર બિરાજ્યા.

૭ જ્ઞાન, ધ્યાન, તપ, ત્યાગ, દયા વૈરાગ્ય રૂપ ક્રિયાઓના તથા સત્ય, ચારિત્ર, અને શ્રમણ ધર્મોનો સદા ઉદય કરનાર,

ज्ञानवैराग्यसम्पन्नः क्रियोद्धारक नैष्ठिकः ।
स्याद्वादमर्मतत्त्वज्ञो धर्माधर्मविवेचकः ॥९॥
तत्त्वातत्त्वपदार्थेषु नीरक्षीरज्ञ हंसवत् ।
गच्छशासन संस्कर्ताऽऽचार्यचौथमलो मुनिः ॥१०॥
पूर्णवैराग्यदिव्यात्मा दीनोद्धारधुरन्धरः ।
दिगन्तविश्रुतः शश्वदागमानां बहुश्रुतः ॥११॥
तत्पट्टस्थानमारूढः सदाचारविचारवान् ।
श्रीलालजी महाचार्यो जातो धर्मपरायणः ॥१२॥

---

८ पाखण्डियों का मान मर्दन करने वाले, आचार्य शिवलालजी के पट्टधर आसीन हुए आचार्य उदयसागर महाराज विराजमान हो (दीप्तिमान् हों-जयवन्त हो)

९-१० ज्ञान और वैराग्य से सम्पन्न, क्रिया के उद्धारक, निष्ठावान् स्याद्वाद के मर्म को जानने वाले, धर्म अधर्म की विवेचना करने वाले, तत्त्व-अतत्त्व भूत पदार्थों को जानने में नीर-क्षीर (दुध-पानी) को अलग करने में हंस के समान और गच्छ के शासन में सुधार करने वाले आचार्य चौथमलजी महाराज उदयसागरजी महाराज के पट्ट-पर आसीन हुए ।

११ पूर्ण वैराग्य के कारण दिव्य आत्मा वाले, दीन जनों का उद्धार करने में धुरन्धर, दिशाओं के अन्त तक प्रख्यात, आगमों के विषय में बहुश्रुत

१२ श्री चौथमलजी के पट्टपर आसीन, सदाचार और सद्विचार

---

८ પાખંડિઓના માનનું મર્દન કરનાર આચાર્ય શિવલાલજીના પટ્ટપર બિરાજમાન આચાર્ય ઉદય સાગર મહારાજ સદા બિરાજમાન થાવ. (દીપ્તિમાન થાવ, જયવન્ત થાવ.)

૯-૧૦ જ્ઞાન અને વૈરાગ્ય સંપન્ન, ક્રિયાના ઉદ્ધારક, નિષ્ઠાવાળા સ્યાદ્વાદના મર્મને જાણવાવાળા, તત્ત્વ, અતત્ત્વ રૂપ પદાર્થોને જાણવાવાળા નીર-ક્ષીર (દૂધ પાણીને) જુદા પાડવામા હંસ સરખા અને ગચ્છના શાસનમા સુધારો કરનાર આચાર્ય શ્રી ચોથમલજી મહારાજ ઉદયસાગરજી મ.ના પટ્ટ ઉપર બિરાજમાન થયા.

૧૧ પૂર્ણ વૈરાગ્યના કારણે દિવ્ય આત્માવાળા, દીનદુઃખી જનોનો ઉદ્ધાર કરવામાં ધુરન્ધર, દિગન્તરોમાં પ્રખ્યાત, આગમોના વિષયમાં બહુશ્રુત.

૧૨ શ્રી ચોથમલજીના પદપર બિરાજમાન, સદાચાર અને સદ્ વિચારથી

स्याद्वादवारिधि स्तत्त्व-वाचकानां शिरोमणिः ।
परमौदार्यसम्पन्नः परमातिशयशोभनः ॥१३॥
स्थलीदेशसमुद्धर्ता शासनानां प्रभावकः ।
युगप्रधानवक्ताऽसौ महाचार्यो जवाहिरः ॥१४॥
तच्छिष्यो नम्रभावेन घासीलालो मुनिव्रती ।
कुरुते प्रज्ञापना टीकां भव्यां प्रमेयबोधिनीम् ॥१५॥

मूलम्-से किं तं पण्णवणा ? पन्नवणा दुविहा पण्णत्ता, तं जहा-जीव पन्नवणा य अजीव पन्नवणा य ॥सू० १॥

छाया—अथ का सा प्रज्ञापना ? प्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा जीव-प्रज्ञापना च, अजीवप्रज्ञापना च ॥१॥

टीका—अथ प्रज्ञापना शब्दस्य कोऽर्थः ? अत्रोच्यते-प्रकर्षेण-यथाऽव-

---

-से सम्पन्न तथा धर्म में परायण श्रीलालजी महान् आचार्य हुए।

१३ स्याद्वाद सिद्धान्त के वारिधि, (समुद्र) व्याख्याताओं में शिरोमणि, अत्यन्त उदार, उत्तम अतिशयों से शोभायमान होनेवाले-

१४ थलीदेश के उद्धारक अर्थात् थली प्रदेश में सद्धर्म का बीज बोने वाले, शासन के प्रभावक, युगप्रधान वक्ता अर्थात् अपने मार्मिक प्रवचनों द्वारा नवीन युग का निर्माण करने वाले, महान् आचार्य श्री जवाहरलालजी महाराज श्री लालजी म. के पाट पर सुशोभित हुए।

१५ उनका शिष्य मुनिव्रतों का आराधक मैं घासीलालमुनि नम्रतापूर्वक प्रमेयबोधिनी नामक भव्य प्रज्ञापना सूत्र की टीका का निर्माण कर रहा हूं।

टीका—'से किं तं' इत्यादि ।

प्रज्ञापना शब्द का अर्थ क्या है ? समाधान-जिसके द्वारा जीव

યુક્ત તથા ધર્મ પરાયણ શ્રી લાલજી મહાન્ આચાર્ય થયા.

૧૩ સ્યાદ્વાદ સિદ્ધાન્તના વારિધિ (સમુદ્ર) વ્યાખ્યાતાઓમાં શિરોમણિ, અત્યન્ત ઉદાર, ઉત્તમ અતિશયોથી શોભાયમાન થવાવાળા-

૧૪ થલીદેશના ઉદ્ધારક અર્થાત્ થલીપ્રદેશમા સદ્ ધર્મના બીજ રોપવાવાળા, શાસનનાપ્રભાવક, યુગપ્રધાનવક્તા અર્થાત્ પોતાના માર્મિક પ્રવચનો દ્વારા નવીનયુગનું નિર્માણ કરવાવાળા, મહાન આચાર્ય શ્રી જવાહરલાલજી મહારાજ શ્રી લાલાજી મ.ની પાટ પર સુશોભિત થયા.

૧૫ તેમનો શિષ્ય મુનિવ્રતોનો આરાધક હુ ઘાસીલાલ મુનિ નમ્રતાપૂર્વક પ્રમેયબોધિની નામક પ્રજ્ઞાપના સૂત્રની ટીકાનું નિર્માણ કરી રહ્યો છું.

स्थितस्वरूपप्ररूपणलक्षणेन अशेषकुतीर्थि तीर्थकरासाध्येन ज्ञाप्यन्ते जीवाऽजीवादयः पदार्थाः शिष्यबुद्धौ स्थाप्यन्ते, अनया, इति प्रज्ञापना, अस्याश्च समवायनाम चतुर्थाङ्गस्योपाङ्गत्वमवसेयम् तदुक्तार्थप्रतिपादकत्वात्, नचोक्तार्थप्रतिपादने पौनरुक्त्यापत्तिः उक्तार्थस्य पुनः कथने प्रयोजनाभावादिति वाच्यम्, मन्दबुद्धिशिष्यजनानुग्रहार्थम् उक्तार्थानामपि विस्तरेणाभिधानस्य सार्थकत्वसम्भवात्, अस्य च प्रज्ञापना सूत्रस्योपाङ्गत्वेऽपि प्रायेण अखिलजीवाऽजीवादि पदार्थशासनात् शास्त्रत्वं वोध्यम्, शास्त्रादौ च प्रेक्षावतां प्रवृत्त्यर्थम् अवश्यं

अजीव आदि तत्त्व प्रकर्ष रूप से ज्ञापित किए जाए उसे प्रज्ञापना कहते हैं। यहां प्रकर्ष का अभिप्राय है समस्त कुतीर्थिकों के नेता जैसी प्ररूपणा करने में असमर्थ हैं और जो प्ररूपणा वस्तु स्वरूप को यथार्थ रूप से प्रकट करती है। ज्ञापित करने का अर्थ है-शिष्यों की बुद्धि में स्थापित कर देना-जमा देना।

प्रज्ञापना समवाय नामक चौथे अंग का उपांग है, क्योंकि इस में उन्हीं तत्वों का कथन है जिन का समवाय अंग में कथन किया गया है। कहे हुए अर्थ को कहने से पुनरुक्ति दोष होता है, क्योंकि कहे अर्थ को कहना निष्प्रयोजन है ऐसा कहना सत्य नहीं हैं। मन्द बुद्धि शिष्यों के अनुग्रह के लिए कथित अर्थ को यदि विस्तार से कहा जाय तो वह सार्थक होता है।

'से किं तं' इत्यादि।

પ્રજ્ઞાપના શબ્દનો અર્થ શો છે? સમાધાન-જેના મારફતે જીવ અજીવ આદિ તત્વ પ્રકર્ષ રૂપે જણાવવામા આવે તેને પ્રજ્ઞાપના કહે છે. અહીં આ પ્રકર્ષનો અભિપ્રાય છે સમસ્ત કુતીર્થિકોના નેતા જેની પ્રરૂપણા કરવામાં અસમર્થ છે અને જે પ્રરૂપણા વસ્તુ સ્વરૂપને યથાર્થ રૂપે પ્રકટ કરે છે, જ્ઞાપિત કરવાનો અર્થ છે-શિષ્યોની બુદ્ધિમાં સ્થાપિત કરી દેવું.

પ્રજ્ઞાપના, સમવાય નામના ચોથા અંગનું ઉપાંગ છે. કેમકે એમાં એ તત્ત્વોનુ કથન છે કે જેઓનું સમવાય અંગમાં કથન કરેલું છે. કહેલા અર્થને કહેવાથી પુનરુક્તિ દોષ આવે છે, કેમકે કહેલા અર્થને કહેવા તે નિષ્પ્રયોજન છે, એવુ કહેવુ તે સત્ય નથી. ઓછી બુદ્ધિવાળા શિષ્યોના ઉપકાર માટે કહેલા અર્થને જો વિસ્તારથી કહેવાય તો તે સાર્થક બને છે.

પ્રજ્ઞાપના જો કે ઉપાગ છે તો પણ જીવ અજીવ વિ. સમસ્ત પદાર્થોનું શાસન (નિરૂપણ) કરવાના કારણે એ શાસ્ત્ર જ છે એમ સમજવું જોઇએ.

प्रयोजनाभिधेयसम्बन्धत्रितयम् अनुबन्धचतुष्टयं मङ्गलञ्च वक्तव्यम्, तथाचोक्तम्-

'सिद्धार्थं सिद्धसम्बन्ध श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः स प्रयोजनः इति, ॥१॥
प्रेक्षावतां प्रवृत्यर्थं फलादित्रितयं स्फुटम् ।
मङ्गलञ्चैव शास्त्रादौ वाच्यमिष्टार्थसिद्धये ॥२॥ इति ।

तत्र प्रयोजनं द्विविधम्-परम्, अपरञ्च, तच्चापि प्रत्येकं द्विधा कर्तृगतं श्रोतृगतञ्च, तत्र द्रव्यार्थिकनयेन आगमस्य नित्यत्वात्, कर्तुरभाव एव, उक्तञ्च-

---

प्रज्ञापना यद्यपि उपांग है तथापि जीव, अजीव आदि समस्त पदार्थों का शासन (निरूपण) करने के कारण से शास्त्र ही समझना चाहिए।

शास्त्र की आदि में, बुद्धिमानों की प्रवृत्ति के लिए शास्त्र का प्रयोजन, अभिधेय (विषय) सम्बन्ध और मंगल, ये चार बातें अवश्य बतलानी चाहिए।

कहा भी है-'सिद्ध अर्थवाले और सिद्ध सम्बन्ध वाले शास्त्र को ही श्रवण करने के लिए श्रोता प्रवृत्त होता है, अतः शास्त्र की आदि में प्रयोजन सहित सम्बन्ध का कथन कर देना चाहिए ॥१॥

बुद्धिमानों की प्रवृत्ति के लिए फल आदि तीन बाते स्पष्ट रूप से बतला देनी चाहिए और दृष्ट अर्थ की सिद्धि के लिए मंगल भी कहना चाहिए॥२॥

इन में से प्रयोजन दो प्रकार का है-१ परप्रयोजन और २ अपर प्रयोजन, । इन दोनों के भी दो-दो भेद हैं-प्रथम शास्त्रकर्त्ता का

શાસ્ત્રની શરૂઆતમાં, બુદ્ધિમાનોની તેમા-પ્રવૃત્તિ થાય તે માટે શાસ્ત્રનું પ્રયોજન, અભિધેય (વિષય) સમ્બન્ધ અને મંગળ આ ચાર વાતો તો અવશ્ય બતાવવી જોઇએ. કહયુ પણ છે,-સિદ્ધ અર્થવાળા અને સિદ્ધ સમ્બન્ધ વાળા શાસ્ત્ર નું જ શ્રવણ કરવા માટે શ્રોતાઓ પ્રવૃત્તિ થાય છે. તેથી શાસ્ત્રની આદિમાં પ્રયોજન સહિત તેના સમ્બન્ધનુ કથન કરવુ જોઇએ. ॥૧॥

બુદ્ધિમાનોની પ્રવૃત્ત થવા માટે ફળ વિગેરે ત્રણ વાતો તો સ્પષ્ટતાથી બતાવી દેવી જોઇએ અને દૃષ્ટ અર્થની સિદ્ધિ માટે મંગળ પણ કરવું જોઇએ. (૨)

એમાં પ્રયોજન બે પ્રકારનું છે. (૧) પરપ્રયોજન અને (૨) અપરપ્રયોજન એ બેના પણ બબ્બે ભેદ છે-પ્રથમ શાસ્ત્રકર્તાનું પર અપર પ્રયોજન,

'एषा द्वादशाङ्गी न कदाचिन्नासीत्, न कदाचिन्न भवति, न कदाचिन्न भविष्यति, ध्रुवा नित्या शाश्वती' इत्यादि, पर्यायार्थिकनयेन तु आगमस्याऽपि अनित्यत्वाद् अवश्यमेव तत्कर्तृसद्भावः वस्तुतस्तु आगमस्य सूत्रार्थोभयरूपत्वात्, अर्थापेक्षया नित्यत्वात् सूत्रापेक्षया चानित्यत्वात् कथञ्चित् तत्कर्तृसद्भावो बोध्यः, तत्र सूत्रकर्तुः साक्षात्प्रयोजनभूतानुग्रहः, परम्पराप्रयोजनन्तु मोक्षादिप्राप्तिः तथा चोक्तम्—

'सर्वज्ञोक्तोपदेशेन यः सत्त्वानामनुग्रहम् ।
करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम् ॥१॥ इति'

पर-अपर प्रयोजन, दूसरा श्रोता का पर-अपर प्रयोजन। द्रव्यार्थिक नय की अपेक्षा से आगम नित्य है, अतः उसका कोई कर्त्ता है ही नहीं।

कहा भी है-'यह द्वादशांगी कभी नहीं थी, ऐसा नहीं है, कभी नहीं है, ऐसा भी नहीं है, कभी नहीं होगी, ऐसा भी नहीं है। यह ध्रुव, नित्य और शाश्वत है, इत्यादि। पर्यायार्थिक नय की अपेक्षा से आगम अनित्य है, अतएव उसका कर्त्ता अवश्य होता है। वास्तविकता यह है कि आगम सूत्र और अर्थ-उभयरूप है और वह अर्थ की अपेक्षा से नित्य और सूत्र की अपेक्षा से अनित्य है, अतएव उसका कर्त्ता कथंचित् होता है।

सूत्रकर्त्ता का साक्षात् प्रयोजन प्राणियों का अनुग्रह करना है और परम्परा प्रयोजन मोक्ष प्राप्त करना है। कहा भी है-

'जो पुरुष सर्वज्ञ के उपदेश द्वारा दुःख से पीडित जीवों का अनुग्रह करता है, वह शीघ्र ही मोक्ष प्राप्त कर लेता है ॥१॥

બીજા શ્રોતાઓનું પર અપર પ્રયોજન, દ્રવ્યાર્થિક નયની અપેક્ષાએ આગમ નિત્ય છે. તેથી તેનો કોઇ કર્તા નથી. કહ્યુ પણ છે કે આ દ્વાદશાંગી કયારેય ન હતી એમ નથી. કયારેય નહી હોય એમ પણ નથી, કયારેય હશે નહીં એમ પણ નથી.

આ તો ધ્રુવ નિત્ય અને શાશ્વત છે. વિગેરે પર્યાયાર્થિક નયની અપેક્ષાએ આગમ અનિત્ય છે. તેથી તેના કર્તા અવશ્ય હોય છે. આ વાસ્તવિકતા છે કે આગમ સૂત્ર અને અર્થ ઉભયરૂપ છે. અને એ અર્થની અપેક્ષાએ નિત્ય અને સૂત્રની અપેક્ષાએ અનિત્ય છે એથી જ એનો કર્તા કયારેક હોય છે.

સૂત્ર કર્તાનું સાક્ષાત્પ્રયોજન પ્રાણીઓ ઉપર અનુગ્રહ કરવો તે છે. અને પરંપરા પ્રયોજન મોક્ષ પ્રાપ્ત કરવો તે છે. કહ્યુ પણ છે કે-

જે પુરૂષ સર્વજ્ઞના ઉપદેશ દ્વારા દુ ખથી પીડાએલા જીવોનો અનુગ્રહ કરે છે, તે જલ્દીથી મોક્ષ પ્રાપ્ત કરી લે છે.

तदर्थं प्रतिपादयितु रर्हतः किं प्रयोजनमिति चेदत्रोच्यते–तस्य कृतकृत्यतया किञ्चिदपि प्रयोजनाभावात्, प्रयोजनं विना अर्थप्रतिपादनप्रयासो व्यर्थ इति वाच्यम्, तस्य तीर्थकर नाम कर्म विपाकोदयेन सम्भवात्, उक्तञ्च–'तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाए' तच्च कथं वेद्यते ? अग्लान्या धर्मदेशनायैव' इति, श्रोतृणां साक्षात् प्रयोजनं विवक्षिताध्ययनार्थं परिज्ञानम्, परम्पराप्रयोजनन्तु निःश्रेयसावाप्तिः, तथाहि–श्रोतारः खलु विवक्षित मध्ययनार्थं सम्यक्तया अधिगम्य संसारप्रपञ्चाद् विरज्यन्ते, विरक्ताश्च भूत्वा संसारान्निर्गन्तु मिच्छन्तः

कहा जा सकता है कि आगम के अर्थ के मूलकर्त्ता अर्हन्त भगवान् का क्या प्रयोजन हो सकता है ? वे कृतकृत्य हो चुके होते हैं, अतः उनका कोई प्रयोजन नहीं होता और प्रयोजन के विना अर्थ का प्रतिपादन करना वृथा है, ऐसा नहीं कहना चाहिए।

तीर्थंकर भगवान् तीर्थंकर नाम कर्म के उदय से अर्थ का प्रतिपादन करते हैं। कहा भी है–'तीर्थंकर नाम कर्म किस प्रकार से वेदन किया जाता है ? उत्तर यह है कि विना ग्लानि से धर्मदेशना देने से उसका वेदन होता है।

श्रोताओं का साक्षात् प्रयोजन अध्ययन के अर्थ का ज्ञान हो जाना हैं, अर्थात् आगम का श्रवण करने वाले को उसका इष्ट अर्थ मालूम हो जाता है। श्रोता का परम्परा प्रयोजन मोक्ष की प्राप्ति होती है। श्रोता अपने विवक्षित अध्ययन के अर्थ को समीचीन रूप से जानकर सांसारिक प्रपंच से विरक्त हो जाते हैं।

કહેવુ જોઇએ કે આગમના અર્થના મૂળ કર્તા અર્હન્ત ભગવાનને શું પ્રયોજન હોઇ શકે ? તેઓ તો કૃતકૃત્ય બની ચુકેલા હોય છે, તેથી તેમને કોઇ પ્રયોજન હોતું નથી અને પ્રયોજન વિના અર્થનું પ્રતિપાદન કરવુ વૃથા છે. એમ ન કહેવુ જોઇએ.

તીર્થંકર ભગવાન તીર્થંકર નામ કર્મના ઉદયથી અર્થનુ પ્રતિપાદન કરે છે કહેલુ પણ છે કે તીર્થંકર નામ કર્મ કેવી રીતે જાણી શકાય છે ? તેનો ઉત્તર આ છે કે વિના સંકોચે ધર્મદેશના દેવાથી એનુ વેદન થાય છે.

શ્રોતાઓનુ પ્રત્યક્ષ પ્રયોજન અધ્યયનના અર્થનુ જ્ઞાન બને છે, અર્થાત્ આગમના શ્રવણ કરનારને એનો અભિષ્ટ અર્થ જણાઇ આવે છે શ્રોતાઓનું પરંપરા પ્રયોજન મોક્ષની પ્રાપ્તિ થાય છે શ્રોતા પોતાના વિવક્ષિત અધ્યયનના અર્થને રૂડી રીતે જાણીને સાંસારિક પ્રપંચથી વિરકત બની જાય છે.

संयममार्गे यथाऽऽगमसम्यक्त्वेन प्रवृत्तिं कुर्वन्ति, तत्र प्रवृत्तानां संसारान्निवृत्तानां संयमप्रकर्ष वशात् निःशेषकर्मक्षयेण अपवर्गप्राप्तिः सम्भवति, तथाचोक्तम्-

'सम्यग्भावपरि ज्ञानाद् विरक्ता भवतो जनाः ?
क्रियाऽऽसक्ताह्यविघ्नेन गच्छन्ति परमां गतिम् ॥१॥ इति,

अभिधेयश्चात्र जीवाऽजीवादिनवतत्त्वस्वरूपं बोध्यम्, तच्च पूर्वं प्रदर्शितमेव, सम्बन्धो द्विविधः-कार्यकारणभावात् परपर्यायः उपायोपेय भावलक्षणः, गुरुपर्वक्रमलक्षणश्च, तत्र प्रथमस्तर्कानुसारिणामपेक्षया, तथाहि-वचनरूपापन्नं प्रकरणमुपायः, तत्परिज्ञानञ्चोपेयम्, गुरुपर्वक्रमलक्षणस्तु केवल श्रद्धानुसारिणामपेक्षया

विरक्त होकर भवभ्रमण से छुटकारा पाने की इच्छा करते हुए आगम के अनुसार संयम मार्ग में सम्यक् प्रवृत्ति करते हैं। संयम में प्रवृत्त और संसार से निवृत्त श्रोताओं को संयम की उत्कृष्टता के कारण समस्त कर्मों का क्षय हो जाने से मोक्ष प्राप्त हो सकता है।

कहा भी है-'वस्तु स्वरूप के यथार्थ परिज्ञान से मनुष्य संसार से विरक्त हो जाते हैं और फिर क्रिया में अनुरक्त होकर परमगति (मोक्ष) प्राप्त कर लेते हैं ॥१॥

इस शास्त्र का अभिधेय (विषय) जीव अजीव आदि नौ तत्व है, उसका कथन पहले ही किया जा चुका है।

सम्बन्ध दो प्रकार का होता है-एक कार्य कारणभाव या उपायोपेयभाव सम्बन्ध और दूसरा गुरुपर्व क्रम रूप। पहला सम्बन्ध तर्क का अनुसरण करने वालों की अपेक्षा से है। वह इस प्रकार-वचन रूप प्रकरण उपाय और उसका ज्ञान उपेय है। गुरुपर्व क्रम रूप

વિરક્ત બનીને ભવભ્રમણથી છૂટકારો પામવાની ઇચ્છા કરતો આગમમાં બતાવેલ માર્ગ અનુસાર સંયમ માર્ગમાં દૃઢ પ્રવૃત્તિ કરે છે. સંયમમાં પ્રવૃત્ત અને સંસારથી નિવૃત્ત એવા શ્રોતાઓને સંયમની ઉત્કૃષ્ટતાનું કારણ સમસ્ત કર્મોનો ક્ષય થઇ જવાથી મોક્ષપ્રાપ્તિ થઈ શકે છે. કહ્યું છે કે વસ્તુ સ્વરૂપના યથાર્થ પરિજ્ઞાનથી માણસ સંસારથી વિરક્ત બની જાય છે. અને પછી ક્રિયામાં આસક્ત થઈને પરમગતિ મોક્ષ, પ્રાપ્ત કરી લે છે. (૧) આ શાસ્ત્રનો અભિધેય (વિષય) જીવ અજીવ વિગેરે નવ તત્ત્વ છે. એનું નિરૂપણ આગળ જ કરી દેવાયું છે.

સમ્બન્ધ બે પ્રકારનો હોય છે-એક કાર્ય કારણભાવ અથવા ઉપાયોપેય ભાવ સમ્બન્ધ અને બીજો ગુરૂપર્વ ક્રમરૂપ. પહેલો સમ્બન્ધ તર્કશાસ્ત્રનું અનુસરણ કરનારાઓની અપેક્ષાએ છે. તે આ પ્રકારે-વચન રૂપ પ્રકરણ ઉપાય

बोध्यः, स च स्वयमेवाग्रे सूत्रकृताऽभिधास्यते, अस्याश्च प्रज्ञापनाया उपाङ्गरूपायाः सम्यग्ज्ञानहेतुत्वेन परम्परया मोक्षप्रापकत्वात् श्रेयोभूतत्वं बोध्यम्, अतः 'श्रेयांसि बहुविघ्नानि' इति वचनाद् माभूदत्र कश्चिद् विघ्न इति विघ्नव्यूहविध्वंसाय शिष्य शिक्षणाय शिष्याणां मङ्गलादि परिग्रहाय स्वतो मङ्गलरूपाया अपि अस्याः आदिमध्यान्तेषु मङ्गलं वक्तव्यम्, तत्र आदिमङ्गलं तावत् निर्विघ्नेन शास्त्र परिसमाप्त्यर्थम्, मध्यमङ्गलम् अवगृहीतशास्त्रार्थस्थिरीकरणार्थम्, अन्तमङ्गलं शिष्यप्रशिष्यपरम्परया शास्त्रस्याव्यवच्छेदार्थम्–तथाचोक्तम्–

सम्बन्ध केवल श्रद्धानुसारी जनों की अपेक्षा से समझना चाहिए। सूत्रकार स्वयं आगे उसका कथन करेंगे।

उपांग रूप यह प्रज्ञापना सूत्र सम्यग्ज्ञान का कारण होने से श्रेयोभूत (कल्याणमय) है और 'श्रेयस्कर कार्यों में बहुत विघ्न आते हैं, इस कथन के अनुसार इस में कोई विघ्न उपस्थित न हो, इस प्रकार विघ्नों का विनाश करने के लिए, शिष्यों को शिक्षा देने के लिए तथा शिष्यों की बुद्धि में मंगल–परिग्रह के लिए अर्थात् शिष्य ऐसा समझे कि–हमने मंगल किया है, इसलिए स्वतः मंगल रूप भी इस शास्त्र की आदि में मध्य में और अन्त में मंगल कहना चाहिए। इनमें से आदि मंगल का प्रयोजन शास्त्र की निर्विघ्न समाप्ति होता है। मध्य मंगल ग्रहण किए हुए शास्त्र के अर्थ को स्थिर करने के

અને તેનું જ્ઞાન ઉપેય છે. ગુરૂપર્વક્રમ રૂપ સમ્બન્ધ કેવળ શ્રદ્ધાનુસારી જનોની અપેક્ષાએ સમજવો જોઈએ. સૂત્રકાર પોતે જ આગળ એનું કથન કરશે.

ઉપાંગરૂપ આ પ્રજ્ઞાપના સૂત્ર સમ્યક્ જ્ઞાનનુ કારણ થવાથી શ્રેયોભૂત (કલ્યાણમય) છે. અને શ્રેયસ્કર કાર્યોમાં ઘણા વિઘ્નો આવે છે. આ કથન અનુસાર આમાં કોઇ વિઘ્ન ન આવે, આમ વિઘ્નોનો વિનાશ કરવા માટે, શિષ્યોને શિક્ષા દેવા માટે તેમજ શિષ્યોની બુદ્ધિમાં મંગલ પરિગ્રહને માટે અર્થાત્ શિષ્ય એમ સમજે કે અમે મંગળ કર્યું છે એટલા માટે સ્વયં મંગલ રૂપ હોવા છતાં આ શાસ્ત્રની શરૂઆતમાં મધ્યમાં અને અન્તમા મંગલ કરવું જોઈએ. આમાથી આદિ મંગળનુ પ્રયોજન શાસ્ત્રની નિર્વિઘ્ન સમાપ્તિ હોય છે. મધ્યમંગલ ગ્રહણ કરેલા શાસ્ત્રના અર્થને સ્થિર કરવા માટે અને અન્તિમ મંગલનું પ્રયોજન છે કે શિષ્યોની પરંપરા ચાલુ રહે અને શાસ્ત્ર વિચ્છિન્ન ન બનવા પામે. કહ્યુ છે કે ' મંગલ શાસ્ત્રની આદિમાં, મધ્યમાં અને અન્તમાં

तं मंगलमाईए मज्झं पज्जंतए य सत्थस्स ।
पढमं सत्थत्था विग्घपारगमणाय निद्दिट्ठं ॥१॥
तस्सेव थेज्जत्थं मज्झिमयं अंतिमंपि तस्सेव ।
अव्वोच्छित्तिनिमित्तं सिस्स पसिस्साइवंसस्स ॥२॥
तन्मङ्गलमादौ मध्ये पर्यन्ते च शास्त्रस्य ।
प्रथमं शास्त्रार्थाविघ्नपारगमनाय निर्दिष्टम् ॥१॥
तस्यैव च स्थैर्यार्थं मध्यमन्त्यमपि तस्यैव ।
अव्युच्छित्तिनिमित्तं शिष्यप्रशिष्यादि वंशस्य ॥२॥ इति,

तत्र-प्रथमपदगतेन-'ववगयजरामरणभये' इत्यादिना, ग्रन्थे शास्त्रकारेण आदिमङ्गलं कृतम्, तत्र जिनरूपेष्टदेवतास्तवनस्य परममङ्गलत्वात्, उपयोग-पदगतेन-'कइविहेणं भंते ! उवओगे पण्णत्ते' इत्यादिना मध्यममङ्गलं कृतम् उपयोगस्य ज्ञानलक्षणत्वात्, ज्ञानस्य च कर्मक्षयं प्रति प्रधानहेतुतया मङ्गलत्वात्,

---

लिए और अन्तिम मंगल का प्रयोजन यह है कि शिष्य-प्रशिष्य की परम्परा चालू रहे और शास्त्र विच्छिन्न न होने पावे।

कहा भी है-'मंगल शास्त्र की आदि में, मध्य में और अन्त में किया जाता है। प्रथम अर्थात् आदि मंगल विना किसी विघ्न के शास्त्र के पार गमन के लिये कहा गया है ॥१॥

मध्य मंगल शास्त्र के अर्थ की स्थिरता के लिए है और अन्त्य मंगल शिष्य प्रशिष्य की परम्परा का विच्छेद न होने के लिए होता है।२।

यहां प्रथम पद के प्रारंभ में 'ववगय जरमरणभये, इत्यादि शब्दों द्वारा शास्त्रकारने आदि मंगल किया है। क्योंकि अपने इष्ट देव जिनेन्द्र का स्तवन करना परम मंगल रूप है।

उपयोग पद में 'भगवन्' उपयोग कितने प्रकार का है? इत्यादि के द्वारा मध्य मंगल किया गया है, क्योंकि उपयोग ज्ञानरूप है और

કરાય છે પ્રથમ અર્થાત્ આદિ મંગલ કોઇપણ વિઘ્ન સિવાય શાસ્ત્રની પરિપૂર્ણતા માટે કહેલું છે ॥ ૧ ॥

મધ્યમંગલ શાસ્ત્રના અર્થની સ્થિરતા માટે છે અને અન્ત્યમંગલ શિષ્ય પ્રશિષ્યોની પરંપરા નો વિચ્છેદ ન થવા માટે હોય છે ॥ ૨ ॥

અહીં આ પ્રથમ પદના પ્રારંભમાં (ववगयजरमरणभये) વિગેરે શબ્દો દ્વારા શાસ્ત્રકારે આદિમંગલ કર્યું છે. કેમકે પોતાના ઇષ્ટદેવ જીનેન્દ્રનું સ્તવન કરવું પરમ મંગલ રૂપ છે. ઉપયોગ પદમાં' ભગવન્ ઉપયોગ કેટલા પ્રકારનો છે? વિગેરે પદો દ્વારા મધ્ય મંગલ કરાયું છે. કેમકે ઉપયોગ જ્ઞાનરૂપ છે અને જ્ઞાન

अथ कर्मक्षयं प्रति ज्ञानस्य प्रधानहेतुत्वमप्रसिद्धम् ?

जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं ।
तं नाणी तिहि गुत्तो खवेइ उस्सासमित्तेणं ॥

यदज्ञानी कर्म क्षपयति बहुकाभि र्वर्षकोटीभिः ।
तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छवासमात्रेण ॥१॥

इत्यागमवचनेन ज्ञानस्य कर्म क्षयम्प्रति प्रधानकारणतायाः सिद्धत्वात्, एवं समुद्घातपदगतेन केवलिसमुद्घात परिसमाप्त्युत्तरकालिकेन सिद्धाधिकार सम्बद्धेन षट् त्रिंशत्पदे-

निच्छिन्न सव्व दुक्खा जाइजरामरणबंधणविमुक्का ।
सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ॥

निश्छिन्न सर्वदुःखा जातिजरामरणवन्धनविमुक्ताः ।
शाश्वत मव्याबाधं तिष्ठन्ति सुखिनः सुखं प्राप्ताः ॥

ज्ञान कर्मक्षय का प्रधान कारण होने से मंगल है। कहा जा सकता है कि कर्मक्षय में ज्ञान प्रधान कारण सिद्ध नहीं है, परन्तु यह कथन उचित नहीं है, क्योंकि आगम मे कहा है-

'अज्ञानी जीव जितने कर्म अनेक करोड वर्षों में खपाता है, उतने कर्मों को तीन गुप्तियों से गुप्त ज्ञानी जन एक उच्छ्वास मात्र में खपा देता है ॥१॥

आगम में इस कथन से सिद्ध है कि ज्ञान कर्म क्षय में प्रधान कारण है। इसी प्रकार छत्तीस वें समुद्घात पद में केवली समुद्घात की समाप्ति के पश्चात् जो सिद्धों का अधिकार चला है उसमें कहा है-

'सिद्ध भगवान् समस्त दुःखों को पार कर चुके हैं, जन्म, जरा, और मरण के बन्धन से मुक्त हो गए हैं और सदा काल बिना किसी बाधा से सुख को प्राप्त होकर सुखी बने रहते हैं ॥१॥

કર્મક્ષયનુ મુખ્ય કારણ હોવાથી મગલ છે. કહેવુ જોઇએ કે કર્મક્ષયમાં જ્ઞાન પ્રધાન કારણ તરીકે સિદ્ધ નથી, પરન્તુ આમ કહેવુ ઉચિત નથી કેમકે આગમમાં કહ્યુ છે-અજ્ઞાની જીવ જેટલા કર્મ અનેક કરોડ વર્ષોમા ખપાવે છે. એટલાં કર્મોને ત્રણ ગુપ્તિઓથી ગુપ્ત જ્ઞાનીજન એક ઉચ્છવાસમાત્રમા ખપાવી દે છે ।૧।

આગમમા આ કથનથી સિદ્ધ છે કે જ્ઞાન કર્મક્ષયમા મુખ્ય કારણ છે એજ પ્રકારે છત્રીસમા સમુદ્ઘાત પદમા કેવલી સમુદ્ઘાતની સમાપ્તિ પછી જે સિદ્ધોનો અધિકર ચાલે છે તેમા કહ્યુ છે-' સિદ્ધ ભગવાન્ સમસ્ત દુ ખોનો પાર કરી ચુકયા છે. જન્મ, જરા અને મરણના બન્ધનથી મુકત થઈ ગયા છે અને સદાકાળ કોઇ પણ જાતની પીડા વગરના સુખને પ્રાપ્ત કરીને સુખી બની રહે છે ॥૧॥

इत्यादिना अन्तमङ्गलं कृतमवसेयम् । अथ प्रथममङ्गलसूत्रं प्ररूपयितुमाह-

ववगयजरमरणभये सिद्धे अभिवंदिऊण तिविहेणं ।
वंदामि जिणवरिंदं तेलोक्कगुरुं महावीरं ॥१॥
व्यपगतजरामरणभयान् सिद्धान् अभिवन्द्य त्रिविधेन ।
वन्दे जिनवरेन्द्रं त्रैलोक्यगुरुं महावीरम् ॥

इत्यस्य व्यपगतजरामरणभयान् सिद्धान् त्रिविधेन अभिवन्द्य त्रैलोक्यगुरुं जिनवरेन्द्रं महावीरं वन्दे इत्यन्वयः,

टीका-तत्र प्रथमं सिद्धपदं व्युत्पाद्यते-सितं-बद्धम् अष्टप्रकारं कर्मेन्धनं

इस गाथा के द्वारा अन्तिम मंगल किया है, यह समझ लेना चाहिए । अब आदि मंगल सूत्र की प्ररूपणा करते हैं-

शब्दार्थ-(ववगय जरमरणभये) जरा, मरण और भय से रहित (सिद्धे) समस्त प्रयोजनों को पूर्ण करनेवाले सिद्ध भगवान् को (अभिवंदिऊणं) वन्दन करके (तिविहेणं) तीनो योगों से (वंदामि) वन्दन करता हूं (तेलोक्कगुरुं) तीनों लोकों के गुरु (महावीरं) महावीर भगवान् को ॥१॥

भावार्थ-जरा मरण और भय से रहित अथवा जरा और मरण के भय से रहित सिद्ध भगवन्तों को तीनों योगों से वन्दन करके, तीनों लोकों के गुरु, जिनवरो में उत्तम चरम तीर्थंकर महावीर को वन्दना करता हूं ॥१॥

टीकार्थ—सर्व प्रथम सिद्ध, पद की व्युत्पत्ति दिखलाते हैं-सित

આ ગાથા દ્વારા અંતિમ મંગલ કર્યું છે. એમ સમજી લેવું જોઇને હવે આદિમંગલ રૂપ સૂત્રની પ્રરૂપણા કરવામાં આવે છે.

શબ્દાર્થ-(ववगयजरमरणभये) જરા મરણ અને ભય રહિત (सिद्धे) સમસ્ત-પ્રયોજનોને સિદ્ધ-પૂર્ણ કરવા વાળા સિદ્ધભગવાનને (अभिवदिऊण) વંદનકરીને (तिविहेण) ત્રણયોગોથી (वंदामि) વન્દન કરું છું (तेलोक्कगुरु) ત્રણ લોકના ગુરૂ (महावीरं) મહાવીર ભગવાનને ॥૧॥

ભાવાર્થ—જરામરણ અને ભય વિનાના અથવા જરા અને મરણના ભય વિનાના સિદ્ધ ભગવન્તોંને ત્રણે પ્રકારના યોગોથી નમસ્કાર કરીને ત્રણે લોકોના ગુરૂ, જીનવરોમાં શ્રેષ્ઠ ચરમ-છેલ્લા તીર્થંકર મહાવીર સ્વામીને વંદના કરૂ છુ. ॥૧॥

ટીકાર્થ-સર્વ પ્રથમ સિદ્ધપદની વ્યુત્પત્તિ બતાવાય છે સિત અર્થાત્ બંધાએલા

ध्माति-जाज्वल्यमान शुक्लध्यानाग्निना दग्धं शास्त्रविधिना यैस्ते सिद्धाः, अथवा-सेधन्ति स्म अपुनरावृत्त्या निर्वृतिपुरीम् अगच्छन् इति-सिद्धा, सिध्यन्ति स्म वा-निष्ठितार्था भवन्ति स्मेति सिद्धाः, सेधन्तेस्म-शासितारोऽभूवन्, मङ्गल्यरूपतां वाऽनुभवन्ति स्मेति सिद्धाः, षिधृ शास्त्रे माङ्गल्ये च' इत्यनुशासनात्, तान् तथाचोक्तम्-

ध्मातं सितं येन पुराणकर्म, यो वा गतो निर्वृति सौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो,
यः सोऽस्तु सिद्धः कृतमङ्गलो मे ॥१॥ इति

यथोक्त सिद्धार्थप्रतिपत्तये विशेषण मा व्यपगत जरामरणभयान् जरा-वृद्धावस्था वयोहानिरूपा, मरणम्-प्राणत्यागरूपम्, भयम्-इहलोकादिभेदात्

अर्थात् बद्ध आठ प्रकार के कर्मरूपी इंधन को, ध्मातं अर्थात् जाज्वल्यमान शुक्लध्यान रूपी अग्नि के द्वारा भस्म कर दिया है जिन्होंने वे सिद्ध इसके अतिरिक्त व्याकरण में 'षिध्' धातु शास्त्र और मंगल के अर्थ का वाचक है। इसके अनुसार जो शास्ता हो चुके हैं या मंगलरूपता का अनुभव कर चुके हैं वे सिद्ध कहलाते हैं कहा भी हैं

जिन्होंने सित (बद्ध) पुरातन कर्मों को ध्मात (भस्म) कर दिया है, या जो मुक्ति महल के उपर पहुंच चुके हैं, जो अनुशास्ता एवं कृतकृत्य के रूप में विख्यात हैं, वे सिद्ध मेरा मंगल करे ॥१॥

इन सिद्धों के अर्थ को समझने के लिए विशेषण कहते हैं-'व्यपगत जरामरणभयान्, यहां जरा का अर्थ हैं वय की गतिरूप वृद्धावस्था, मरण का अर्थ है प्राणों का त्याग और भय का अर्थ है इहलोक आदि संबंधी सात प्रकार की भीति।

આઠ પ્રકારના કર્મ રૂપી ઇંધન (કાષ્ઠ) ને (ध्मातं) અર્થાત્ જાજ્વલ્યમાન શુકલધ્યાન રૂપી અગ્નિ દ્વારા ભસ્મ કરી નાખ્યા છે જેમણે તેઓ સિદ્ધ છે. તદુપરાન્ત વ્યાકરણમાં ષિધ્ ધાતુ શાસ્ત્ર અને મંગલ અર્થનો વાચક છે. તદનુસાર જેઓ જ્ઞાતા થઈ ચુકયા છે. અથવા મંગળ રૂપતાનો અનુભવ કરી ચુકયા છે તેઓ સિદ્ધ કહેવાય છે. કહ્યુપણ છે કે—

જેઓએ સિત (બદ્ધ) પુરાતન કર્મોને (ધ્માત) ભસ્મ કરી નાખ્યા છે, અગર જેઓ મુકિત મહેલના ઉપર પહોચી ગયા છે, જેઓ અનુશાસ્તા અને કૃત કૃત્ય ના રૂપમા વિખ્યાત છે, તે સિદ્ધો મારૂ મંગલ કરે ૧

આ સિદ્ધોનો અર્થ સમજવા માટે વિશેષણો કહે છે—व्यपगतत जरामरणभयान् આહીંયા જરાનો અર્થ વયની હાનિ રૂપ વૃદ્ધાવસ્થા, મરણનો અર્થ છે પ્રાણોનો ત્યાગ અને ભયના અર્થનો ઇહલોક આદિ સમ્બન્ધી સાત પ્રકારની ભીતિ

सप्त प्रकारकम्, तथा चोक्तम्—

इह पर लोगादाणं अकम्ह आजीव मरणमसिलोएत्ति'
इह पर लोकादानाकस्मादाजीवमरणा श्लोका इति,

विशेषेण–अपुनर्भावरूपत्वेन अपगतानि–विनष्टानि जरामरणभयानि येभ्यस्ते तथाविधान् सिद्धान् इति पूर्वेणान्वयः, त्रिविधेन मनोवचः काय लक्षणेन, एतेन योगत्रयव्यापारसहितं द्रव्यवन्दनमिति गम्यते, अभिवन्द्य–आभिमुख्येन वन्दित्वा प्रणम्येत्याशयः महावीरं वन्दे अहमिति शेषः, तत्र वीरयति–कषायादिरिपून् प्रति विक्रामति इति वीरः, महांश्चासौ वीरश्चेति महावीरस्तम्, महावीरइति न यादृच्छिकं नाम, अपितु यथाऽवस्थितमनन्यसाधारणं परीषहोपसर्गादिविषयं वीरत्वमपेक्ष्य देवासुरकृतं बोध्यम्, तथाचोक्तम्—

कहा भी है–(१) इहलोक भय (२) परलोक भय (३) आदान भय (४) अकस्मात् भय (५) आजीविका भय (६) मरण भय और (७) अपकीर्त्तिभय।

इस प्रकार जो जरा मरण और भय से सदा के लिए मुक्त हो चुके हैं। त्रिविधेन अर्थात् मनवचन और काय से इसपद के द्वारा तीनो योगों के व्यापार से युक्त द्रव्य वन्दन सूचित किया गया है। इस प्रकार के सिद्ध भगवन्तों को प्रणाम कर के महावीर को प्रणाम करता हूं। जो कषाय आदि शत्रुओं के प्रति पराक्रम प्रकट करता है, वह वीर कहलाता है और महान वीरको महावीर कहते है। महावीर यह नाम यों ही मनसे नही रक्खा गया है किन्तु वास्तविक अनन्य साधारण एवं परीषहों तथा उपसर्गों को जीतने में प्रकट की गई वीरता के कारणों से देवों और असुरो द्वारा दिया गया नाम है।

કહ્યું પણ છે કે–(૧) આ જગતનો ભય, પરલોક ભય, આદાન ભય, અકસ્માત્ ભય, આજીવિકા ભય, મરણ ભય, (૭) અપકીર્તિ ભય.

આ રીતે જેઓ જરા મરણ અને ભયથી સદાને માટે મુકત બની ચુકયા છે. ત્રિવિધને અર્થાત્ મન. વચન અને કાયાથી આ પદ દ્વારા ત્રણે યોગોના વ્યાપારથી યુકત દ્રવ્ય વન્દન સૂચિત કરાયુ છે. આ પ્રકારના સિદ્ધ ભગવન્તોને પ્રણામ કરીને મહાવીરને પ્રણામ કરૂં છુ જે કષાય આદિ દસ્યુઓ તરફ પ્રરાકમ સમૂહને કરે છે, તે વીર કહેવાય છે અને મહાન્ વીરને 'મહાવીર' કહે છે મહાવિર એ નામ એમને એમ મનથી જ નથી રાખવામાં આવ્યું પરતુ વાસ્તવિક, અનન્ય સાધારણ અને પરીષહો તથા ઉપસર્ગોને જીતવામાં કરેલી વીરતાના કારણે એ દેવો અને અસુરો દ્વારા આપવામા આવેલુ નામ છે

अयले भय भेरवाणं खंति खमे परीसहोवसग्गाणं।
'देवेहिं कए महावीर'त्ति

अचलो भयभैरवेषु क्षान्तिक्षमः परीषहोपसर्गाणां देवैः कृतं महावीर इति एतेन अपायापगमातिशयो व्यज्यते, कीदृशं महावीर मित्याह-जिनवरेन्द्रम्-जयन्ति-रागद्वेषादिरिपून् अभिभवन्ति इति जिनाः, ते च चतुर्विधाः-श्रुतजिनाः, अवधिजिनाः, मनःपर्यायजिनाः, केवलिजिनाः, तेषु केवलिजिनतत्वप्रतिपत्त्यर्थं वरग्रहणम्, जिनानां वराः-श्रेष्ठाः अतितानागतवर्तमानभावस्वभावस्वभावावभासि केवलज्ञानशालित्वात्। जिनवराः, ते चातीर्थंकरा अपि सामान्यकेवलिनो भवन्ति

कहा भी है-भयानक भय उपस्थित होनेपर भी अचल रहने से तथा परीषहां और उपसर्गों को सहन करने में समर्थ होनेसे देवों ने महावीर यह नाम रक्खा। इस विशेषण के द्वारा भगवान् में अपायागम नामक अतिशय प्रकट किया है।

महावीर कैसे हैं सो कहते हैं-वह जिनवरेन्द्र है। जो राग-द्वेष आदिरिपुओं को जीतते हैं, वे जिन कहलाते हैं। जिन चार प्रकार के होते हैं यथा-(१) श्रुतजिन (२) अवधिजिन (३) मनःपर्याय जिन और (४) केवलि जिन। इनमेंसे महावीर केवलि जिन है, यह सूचित करने के लिए वर का प्रयोग किया गया है।

जिनों में जो वर अर्थात् श्रेष्ट हो या भूत वर्त्तमान और भविष्यत् काल के समस्त पदार्थों को जानने वाले केवल ज्ञान से युक्त हो वे जिनवर कहलाते हैं। परन्तु ऐसे जिनवर तो सामान्य केवली भी

કહ્યુ પણ છે કે—ભયાનક ભય ઉપસ્થિત થયે છતે પણ અચલ રહેવાથી તેમજ પરીષહો તથા ઉપસર્ગોને સહન કરવામા સમર્થ હોવાને લીધે દેવોએ મહાવીર એ નામ રાખ્યુ છે. આ વિશેષણથી ભગવાનમા અપાયાપ ગમ નામ નો અતિશય પ્રગટ કરાયેા છે.

મહાવીર કેવાછે તે કહે છે—તે જિનવરેન્દ્ર છે. જેઓ રાગ, દ્વેષ આદિ શત્રુ ઓને જીતે છે, તેઓ જીન કહેવાય છે. જિન ચાર પ્રકારના હોય છે—(૧) શ્રતજીન (૨) અવધિજિન (૩) મનઃપર્યાયજીન અને (૪) કેવલીજીન એઓમાં મહાવીર કેવલી જીન છે. એ સૂચિત કરવા માટે 'વર' એપદનો પ્રયેાગ કરાયેા છે.

જિનોમા જે વર અર્થાત્ શ્રેષ્ઠ હોય અગર ભૂત વર્તમાન અને ભવિષ્યત્ કાળના સમસ્ત પદાર્થોના જાણવા વાળા કેવલ જ્ઞાનથી યુકત હોય તેઓ જિનવર કહેવાય છે. પરન્તુ આવા જિનવર તો સામાન્ય કેવલી પણ હોય છે કે

अतस्तीर्थंकरत्व प्रतिपत्तये इन्द्रग्रहणं कृतम्, जिनवराणामिन्द्रो जिनवरेन्द्रः प्रकृत-
पुण्यस्कन्धरूपतीर्थंकरनामकर्मोदयात् तीर्थंकरस्तम्, एतेन ज्ञानातिशयः
पूजातिशयश्च गम्यते, ज्ञानातिशयं विना जिनानां मध्ये श्रेष्ठत्वस्य पूजातिशयं
विना च जिनवराणामपि मध्ये इन्द्रत्वस्यासंभवात्, पुनः कीदृशं महावीरमित्याह-
त्रैलोक्यगुरुम्' गृह्णाति-यथास्वरूपं प्रवचनार्थं मुपदिशतीति गुरुः त्रिलोकी एव
त्रैलोक्यं तस्य गुरुः, एवञ्च भगवान् महावीरः अधोलोकनिवास्यासुरकुमारा-
दिभवनपतिदेवेभ्यः, तिर्यग्लोकनिवासि वानव्यन्तरनरपशुविद्याधरज्योतिषि-
केभ्यः, ऊर्ध्वलोकनिवासि सौधर्मैशानादि वैमानिकदेवेभ्यश्च धर्ममुपदिष्टवान् तं

होते हैं जो तीर्थंकर नहिं होते। अतःमहावीर तीर्थंकर थे, यह बतलाने के लिए जिनवर के साथ इन्द्र, अर्थात् जिनवरेन्द्र विशेषण लगाया गया है।

महावीर प्रकृष्ट पुण्य प्रकृति तीर्थंकर नामकर्म के उदय से तीर्थंकर थे। इस विशेषण के द्वारा उनके ज्ञानातिशय को सूचित किया गया। पूजातिशय ऊपर से समझ लेना चाहिए क्योंकि ज्ञानातिशय के विना जिनों में श्रेष्टता नहीं हो सकती और पूजातिशय के विना जिनवरों में इन्द्रत्व होना असंभव है। महावीर तीनों लोकों के गुरु है। जो यथार्थ रूप से प्रवचन के अर्थ का प्रतिपादन करता है, वह गुरु कहलाता है।

भगवान् महावीर ने अधोलोक में निवास करने वाले असुर कुमार आदि भवनपति देवों के लिए, मध्य लोक में रहने वाले वानव्यन्तरों, मनुष्यों, पशुओं, विद्याधरों तथा ज्योतिष्क देवों के लिए और उर्ध्वलोक निवासी सौधर्म, ऐशान, आदि वैमानिक देवों के

જેઓ તીર્થંકર નથી હોતા. આથી મહાવીર તીર્થંકર હતા એમ બતાવવા માટે જિનવરની સાથે ઇન્દ્ર અર્થાત્ જિનવરેન્દ્ર વિશેષણ લગાડયું છે.

મહાવીર પ્રકૃષ્ટ પુણ્ય પ્રકૃતિ તીર્થંકર નામ કર્મના ઉદયથી તીર્થંકર હતા એ વિશેષપણાથી એમના જ્ઞાનાતિશયને સૂચિત કર્યા છે. પૂજાતિશય ઉપરથી સમજી લેવો જોઈએ કેમકે જ્ઞાનાતિશય સિવાય જિનોમા શ્રેષ્ઠતા નથી થઇ શકતી અને પૂજાતિશયના વિના જિનવરોમા ઇન્દ્રત્વ થવું અસંભવ છે. મહાવીર ત્રણેલોકના ગુરૂ છે. જે યથાર્થ રૂપે પ્રવચનના અર્થને પ્રતિપાદન કરે છે તે ગુરૂ કહેવાય છે.

ભગવાન મહાવીરે અધોલોકમા નિવાસ કરનારા અસુર કુમાર આદિભવનપતિદેવોને માટે, મધ્યલોકમા રહેનારા વાનવ્યંતરો, મનુષ્યો, પશુઓ વિદ્યાધરો તથા જ્યોતિષ્ક દેવોને માટે અને ઉર્ધ્વ લોક નિવાસી સૌધર્મ-ઐશાન.આદિ

तथाविधम्, एतेन वागतिशयो गम्यते, एते च अपायापगमातिशय ज्ञानातिशय पूजातिशय वचनातिशया श्चत्वारोऽतिशयाः शरीरसौगन्ध्यादीना मतिशयाना मुपलक्षणम्, तान् विना एतेषामसंभवात्, एवञ्च चतुस्त्रिंशदतिशयोपेतं भगवन्तं महावीरं वन्दे इत्यवसेयम् । इति प्रथमगाथार्थः ।

अथ ऋषभादीन् परित्यज्य महावीरस्य वन्दनप्रयोजकधर्मम्-वर्तमानतीर्थाधिपतित्वेन आसन्नोपकारित्वरूपं प्रदर्शयितुं द्वितीयगाथामाह—

'सुयरयणनिहाणं जिणवरेणं भवियजणणिव्वुइकरेणं ।
उवदंसिया भगवया पन्नवणा सव्व भावाणं ॥२॥
श्रुतरत्ननिधानं जिनवरेण भविकजननिर्वृतिकरेण ।
उपदर्शिता भगवता प्रज्ञापना सर्वभावानाम् ॥ इति,

लिए धर्म का उपदेश दिया है, इस कारण वे तीनों लोकों के गुरु हैं । इस विशेषण से उनका वचनातिशय सूचित किया गया है। ये चार अपायापगमातिशय, ज्ञानातिशय, पूजातिशय और वचनातिशय शरीर की सुगंधितता आदि अन्य अतिशयों के उपलक्षण हैं क्योंकि उनके विना ये अतिशय हो नहीं सकते । तात्पर्य यह है कि चौतीस अतिशयों से सम्पन्न भगवान् महावीर को मै वन्दन करता हूं । यह प्रथम गाथा का अर्थ है ।

ऋषभ आदि को छोडकर महावीर को वंदना करनेका कारण यह है कि महावीर वर्त्तमान शासनके अधिपति होने के कारण सन्निकट उपकारक है । यह दिखलाने के लिए दूसरी गाथा कहते हैं—

शब्दार्थ—(सुयरयणनिहाणं) श्रुत रूपी रत्नों का खजाना (जिण

વૈમાનિક દેવોને માટે ધર્મનો ઉપદેશ આપ્યો છે. એ કારણે તેઓ ત્રણેલોક ના ગુરૂ છે. આ વિશેષણથી તેઓ નો વચનાતિશય સૂચિત કરાયો છે. આ ચાર અપાયાપગમાતિશય, જ્ઞાનાતિશય, પૂજાતિશય અને વચનાતિશય આદિ અલ્પ અતિશયોના ઉપલક્ષણ છે, કેમકે તેઓના વિના આ અતિશયો બની શકતા નથી. તેનું તાત્પર્ય એ છે કે ચોવીસ અતિશયોથી યુકત ભગવાન મહાવીરનો હું વન્દના કરૂં છું આ પ્રથમ ગાથાનો અર્થ છે.

ઋષભ આદિને ત્યજીને મહાવીરને વન્દના કરવાનું કારણ આ છે કે મહાવીર વર્તમાન શાસનના અધિપતિ હોવાને કારણે ઉપકારક છે. એ બતાવવાને માટે બીજી ગાથા કહે છે–

શબ્દાર્થ—(सुयरयणनिहाणं) શ્રુતરૂપી રત્નોનો ખજાનો (जिनवरेण) જિન-

अन्वयः—भविकजननिवृतिकरेण भगवता जिनवरेण श्रुतरत्ननिधानं सर्वभावानां प्रज्ञापना उपदर्शिता।

टीका—तत्र जिनवरेण जिनाः सामान्यकेवलिन स्तेषामपि वरः श्रेष्ठस्तीर्थकरत्वात् जिनवरस्तेन आसन्नोपकारित्वाद् महावीरेणेत्यर्थः अन्यस्य केवलिनो वर्तमानतीर्थाधिपतित्वाभावात्, अथ छद्मस्थक्षीणमोहजिना पेक्षया सामान्यकेवलिनामपि जिनवरत्वात् तद्व्यावृत्तये महावीरस्य तीर्थकृत्वप्रतिपत्तये च विशेषणान्तरमाह-भगवता भगः समग्रैश्वर्यादिरूपः, तथाचोक्तम्-

---

वरेणं) जिनवर के द्वारा (भवियजणनिव्वुइकरेणं) भव्य जीवोंको आनन्द या मोक्ष देने वाले (उवदंसिया) दिखलाई (भगवया) भगवान् के द्वारा (पन्नवणा) प्रज्ञापना-प्ररूपणा (सव्व भावाणं) सब पदार्थों की ।२।

भावार्थ—भव्य जीवों को अमर या मोक्ष प्रदान करने वाले जिनेन्द्र भगवान ने श्रुत रूपी रत्नों के खजानेके समान समस्त भावों की प्रज्ञापना प्रदर्शित की है ॥ २ ॥

टीकार्थः—जिन अर्थात् सामान्य केवली उनमें तीर्थंकर होने के कारण जो श्रेष्ठ हैं वे जिनवर कहलाते हैं। उन्होंने अर्थात् निकट उपकारक होने के कारण महावीर स्वामी ने क्योंकि अन्य तीर्थंकर वर्त्तमान तीर्थ के अधिपति नहीं है। कहा जा सकता है कि छद्मस्थ क्षीण मोह जिनकी अपेक्षा सामान्य केवली भी जिनवर कहे जा सकते हैं, अतएव जिनवर शब्दसे तीर्थंकर का अर्थ कैसे समझा जाय? इसका समाधान करने के लिए तथा महावीर स्वामी सामान्य केवली

વર ના દ્વારા (भवियजणनिव्वुइकरेणं) ભવ્ય જીવોને આનંદ અથવા મોક્ષ આપવા વાળા (उवदंसिया) દેખાડી (भगवया) ભગવાન દ્વારા (पन्नवणा) પ્રજ્ઞાપના પ્રરૂપણા (सव्व भावाणं) બધા પદાર્થોની ॥ ૨ ॥

ભાવાર્થ-ભવ્ય જીવોને આનન્દ અથવા મોક્ષ પ્રદાન કરવા વાળા જિનેન્દ્ર ભગવાને શ્રુત રૂપી રત્નોના ખજાનાના સરખી સમસ્ત ભાવોની પ્રજ્ઞાપના પ્રદર્શિત કરી છે ॥ ૨ ॥

ટીકાર્થ—જિન અર્થાત્ સામાન્ય કેવલી એઓમાં તીર્થંકર થવાના કારણે જેઓ શ્રેષ્ઠ છે તેઓ જિનવર કહેવાય છે. તેઓએ અર્થાત્ નિકટ ઉપકારક હોવાના કારણે મહાવીર સ્વામીને કેમકે અન્ય તીર્થંકર વર્તમાન તીર્થના અધિપતિ નથી. કહી શકાયકે છદ્મસ્થ ક્ષીણમોહ જેઓની અપેક્ષાએ સામાન્ય કેવલી પણ જિનવર કહી શકાય છે. તો પછી જિનવર શબ્દથી તીર્થંકર નો અર્થ કેવી રીતે સમજાય ? એનું સમાધાન કરવા માટે તેમજ મહાવીર સ્વામી

'ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः ।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥१॥ इति,

अतिशयो भागोऽस्यास्तीति भगवान्, भगातिशयश्च वर्द्धमानस्वामिनः अन्य प्राणिगणापेक्षया, तस्य त्रैलोक्याधिपतित्वात् तेन भगवता-परमार्हत्य माहात्म्योपेतेन, पुनः किं विशिष्टेनेत्याह-भव्यजननिर्वृतिकरेण-भव्यः-तादृशानादिपारिणामिकभावात् सिद्धिप्राप्तियोग्यः, स चासौ जनश्चेति भव्य-जनः, निर्वृतिः-निर्वाणं शान्तिः, सकलकर्ममलापगमेन स्वस्वरूपलाभेन परमं

नहीं थे, यह बतलाने के लिए दूसरे विशेषण का प्रयोग किया जाता है—भगवान् परिपूर्ण ऐश्वर्य आदि को (भग) कहते हैं। कहा भी है

सम्पूर्ण ऐश्वर्य, रूप, यहां, श्री, धर्म और प्रयत्न, इन छहों को भग, कहते हैं ॥ १ ॥

इस प्रकार भग, अतिशय जिनमें पाया जाता है, वह भगवान् कहलाते हैं। वर्धमान स्वामी में अन्य समस्त प्राणियों की अपेक्षा ऐश्वर्य आदि विशिष्ट है, क्योंकि वे तीन लोक के अधिपति हैं। इस तरह भगवानका आशय हुआ परम अर्हन्तपन की महिमा से युक्त है।

भगवान भव्य जीवों को निर्वृत्ति देने वाले हैं। जीव के अनादि पारिणामिक भाव के कारण जो मुक्ति प्राप्त करते हैं योग्य हो वह भव्य कहा जाता है। ऐसे भव्य जनों को शान्ति अथवा निर्वाण

સામાન્ય કેવલી ન હતા એ બતાવવા માટે બીજા વિશેષણનો પ્રયોગ કરાય છે भगवता પરિપૂર્ણ ઐશ્વર્ય આદિને 'भग' કહે છે-કહ્યુ પણ છે-

સમ્પૂર્ણ ઐશ્વર્ય, રૂપી, યશ, શ્રી, ધર્મ અને પ્રયત્ન આ છને 'भग' કહેવાય છે. ૧.

આ રીતે 'ભગ' અતિશય જેમાં જણાય છે, તેઓ ભગવાન કહેવાય છે. વર્ધમાન સ્વામીમાં અન્ય સમસ્ત પ્રાણિઓની અપેક્ષાએ ઐશ્વર્ય આદિ વિશિષ્ટ છે. કેમકે તેઓ ત્રણ લોકના અધિપતિ છે. આ રીતે ભગવાનનો અશય થયો-પરમ અર્હત્પણ તેના મહિમાથી યુકત છે.

ભગવાન ભવ્ય જીવોને નિર્વૃતિ દેવા વાળા છે. જીવના અનાદિ પારિણામિક ભાવને કારણે જેઓ મુકિત પ્રાપ્ત કરે છે. યોગ્ય થાય, તે ભવ્ય કહેવાય છે. આવા ભવ્ય જનોને શાન્તિ અથવા નિર્વાણ અર્થાત્ બધા કર્મોનો ક્ષય થઇ જાય પછી સ્વરૂપના લાભથી પરમ સ્વસ્થતા પ્રદાન કરવા વાળા છે. આમા

स्वास्थ्यम्, कारणेन कार्योपचारात् सम्यग्दर्शनाद्यपि तद्धेतुत्वात् निर्वृतिः तत्करणशीलो निर्वृतिकरः भव्यजनस्य निर्वृतिकरो भव्यजननिर्वृतिकरस्तेन, अथ सर्वं वाक्यं सावधारमितिरीत्या भव्यानामेव सम्यग्दर्शनादिकं करोति, नाभव्यानाम्, परन्तु नैतद्युक्तम्, वीतरागस्य भगवतो हि पक्षपातासंभवात्, तथाहि भगवान् रविरिव प्रकाशम् अविशेषेण सर्वेषां कृतप्रवचनार्थम् आतनोति, अभव्यानां केवलं तथाविधस्वाभाव्यादेव तामसविहगकुलानामिव रविप्रकाशो न प्रवचनार्थः उपदिश्यमानोऽपि उपकाराय समर्थो भवेत्, तथाचोक्तम्--

---

अर्थात् सकल कर्मों का क्षय हो जाने पर स्व-स्वरूप के लाभ से परम स्वस्थता प्रदान करने वाले हैं। यहां कारण में कार्य का उपचार किया गया है। अतः मोक्ष के कारण सम्यग्दर्शन आदि भी मोक्ष कहे गये हैं तात्पर्य यह हुआ कि भगवान् भव्य जीवों को निर्वाण के कारण-भूत सम्यग्दर्शन आदि देने वाले हैं।

शंका—प्रत्येक वाक्य अवधारण युक्त होता है, अतः भगवान् भव्य जीवों को ही सम्यग्दर्शन आदि उत्पन्न करते हैं, अभव्यों को नहीं यह युक्ति नहीं क्योंकि वीतराग भगवान में पक्षपात होना संभव नहीं है।

समाधान— आपने वस्तु तत्व को ठीक नहीं समझा जैसे सूर्य समान रूपसे सभी को प्रकाश देता है, उसी प्रकार भगवान समान भावसे सभीके लिए उपदेश देते हैं, किन्तु जैसे तमश्वर पक्षियों के के लिए, उनके स्वभाव के कारण सूर्य का प्रकाश उपकारक नहीं होता, उसी प्रकार अभव्य जीवों का स्वभाव ही ऐसा है कि उनके लिए भगवान की देशना उपकारक सिद्ध नहीं होती है। कहा भी है

કારણમાં કાર્યનો ઉપચાર કરાયો છે. તેથી મોક્ષના કારણ સમ્યગ્દર્શન વિગેરે પણ મોક્ષ કહેવાયાં છે. તાત્પર્ય આ છે કે. ભગવાન્ ભવ્ય જીવોને નિર્વાણના કારણભૂત સમ્યગ્દર્શન વિગરે દેવા વાળા છે.

શંકા—પ્રત્યેક વાક્ય અવધારણા યુકત હોય છે, એથી ભગવાન્ ભવ્યજીવોને જ સમ્યગ્દર્શન વિગેરે ઉપન્ન કરે છે, અભવ્યોને નહી આ યુકિત નથી કેમકે વીતરાગ ભગવાનમા પક્ષપાત હોવો સ ભવે નહી.

સામાધાન—આપ વસ્તુ તત્વને ઠીક નથી સમજ્યા જેમ સૂર્ય સમાન રૂપે બધાને પ્રકાશ આપે છે, એજ પ્રકારે ભગવાન્ સમાન ભાવથી બધાને ઉપદેશ આપે છે, પરન્તુ જેમ તમશ્વર (ઘુવડ) પક્ષિઓને માટે એમના સ્વભાવને લીધે સૂર્યનો પ્રકાશ તેમને ઉપકારક નથી બનતો આજ પ્રકારે અભવ્ય જીવોનો સ્વભાવજ એવો હોય છે કે તેમને માટે ભગવાનની દેશના ઉપકારક સિદ્ધ

सद्धर्म बीजवपनानघकौशलस्य ।
यल्लोक बान्धव ! तवापि खिलान्यभूवन् ॥
तन्नाद्भूतं खगकुलेषु, च तामसेषु ।
सूर्यांशवो मधुकरी चरणावदाताः ॥१॥

तस्मात् भव्यानामेव भगवद्वचनात् उपकारो भवति, इति भव्य जननिर्वृति करेणेत्युक्तम्; किं कृत्वा ? इत्याह-उपदर्शिता उप सामीप्येन यथा श्रोतृणां झटिति यथाऽवस्थितवस्तुतत्वावबोधो भवति; स्फुटवचनैरिति दर्शिता-श्रवणगोचरं प्रापिता उपदिष्टा इत्यर्थः, काऽसौ ? इत्याह-प्रज्ञापना-प्रज्ञाप्यन्ते-प्ररूप्यन्ते जीवादयो भावा अनया शब्दसंहत्या इति प्रज्ञापना, किं विशिष्टा, इत्याह-श्रुतरत्ननिधानम्, रत्नानि द्विविधानि-द्रव्यरत्नानि भावरत्नानि च,

ऐ लोक के बान्धव सद्धर्म का बीज बोलने वाले पक्षीकुल के लिए सूर्य की तेजस्वी किरणें भी भ्रमर के पैर के समान काली ही प्रतीत होती है ॥ १ ॥

इस कारण भगवान ने वचनों से भव्य जीवोंका ही उपकार होता है । इसी से यहां भव्य जीवों को शांति या मुक्ति देने वाले ऐसा कहा है, भगवान् ने किस तरह निवृर्त्ति प्रदान की, यह दिखलाते हैं भगवान् ने ऐसे स्फुट वचनों द्वारा प्रज्ञापना का उपदेश दिया है कि उसे सुनकर वस्तु के यथार्थ स्वभावका बोध हो जाय । वह श्रुत रत्नों का विधान है । रत्न दो प्रकार के होते है—द्रव्य रत्न और भाव रत्न हैं । वैडूर्य, मरकत इन्द्र नील आदि द्रव्य रत्न हैं और श्रुत

થતી નથી. કહ્યું પણ છે-

હે લોક બાન્ધવ ! સદ્ ધર્મનું બીજ રોપવામાં આપની દક્ષતા નિર્દોષ છે. તો પણ તેને માટે કોઇ જમીન બારોડ નિકળી જાય તેમાં કોઇ આશ્ચર્યની વાત નથી. અન્ધકારમાં વિચરણ કરવા વાળાં પક્ષી સમુદાય માટે સૂર્યના તેજસ્વી કિરણો પણ ભમરાના પગની જેમ કાળાશજ દેખાડે છે. ॥ ૧ ॥

એ કારણથી ભગવાનના વચનોથી ભવ્ય જીવોનોજ ઉપકાર બને છે. એ ઉપરથી અહીયાં ભવ્ય જીવોને શાન્તિ અગર મુકિત દેવાવાળા એમ કહ્યું છે, ભગવાને કેવા પ્રકારે નિર્વૃતિ પ્રદાન કરી, એ બતાવે છે—ભગવાને એવા સ્પષ્ટવચનો દ્વારા પ્રજ્ઞાપના નો ઉપદેશ આપ્યો કે એને સાંભળીને વસ્તુના યથાર્થ સ્વભાવનો બોધ થઇ જાય. આ પ્રજ્ઞાપના શ્રુત રત્નોનુ નિધાન છે. રત્નો બે જાતનાં હોય છે—દ્રવ્યરત્ન અને ભાવરત્ન વૈડૂર્ય, મરકત, ઇન્દ્ર, નીલ વિગેરે

तत्र द्रव्यरत्नानि वैडूर्यमरकतेन्द्रनीलादीनि, भावरत्नानि च श्रुतव्रतादीनि, तत्र द्रव्यरत्नानि न तात्त्विकानि इति भावरत्नैरिहाधिकारः, श्रुतान्येव रत्नानि श्रुतरत्नानि, न तु श्रुतानि च रत्नानि चेति, निधानमिव निधानम्, श्रुतरत्नानां निधानं श्रुतरत्ननिधानम्, केषां प्रज्ञापना क्रियते इत्यत आह–सर्वभावानाम् सर्वे च ते भावाश्चेति सर्वभावाः जीवाजीवपुण्य-पापाश्रवबन्धसंवरनिर्जरामोक्षाः, तथाहि–अस्यां प्रज्ञापनाया षट्त्रिंशत्पदानि सन्ति, तत्र प्रज्ञापना (१) बहुवक्तव्य (३) विशेष (५) चरम (१०) परिणाम (१३) संज्ञेषु पञ्चसु पदेषु जीवाऽजीवानां प्रज्ञापना, प्रयोगपदे (१६) क्रियापदे (२२) चाश्रवस्य, कायवाङ्मनः कर्मयोगः आश्रवः, कर्मप्रकृति पदे (२३) बन्धस्य, समुद्घातपदे (३६) केवलिसमुद्घातप्ररूपणायां संवरनिर्जरामोक्षाणां त्रयाणाम्, शेषेषु च स्थानादिषु (२) पदेषु क्वचित् कस्यचित्, अथवा सर्वभावानां

तथा व्रत आदि भाव रत्न हैं। द्रव्य रत्न वास्तविक नहीं, उन यहां भाव रत्न समझना चाहिए श्रुत रत्न का अर्थ है, श्रुत रूप रत्न, श्रुत और रत्न, ऐसा अर्थ नहीं समझना चाहिए।

प्रज्ञापना किसकी की जाती है इसका उत्तर है सर्व भावों की जीव, अजीव, पुण्य, पाप, आश्रव, संवर बन्ध, निर्जरा और मोक्ष, ये भाव है। इस प्रज्ञापना सूत्र में छत्तीस पद में हैं, वे इस प्रकार हैं

(१) प्रज्ञापना (३) बहु वक्तव्य (५) विशेष (११) चरम और (१३) परिणाम इस पांच पदों में जीव और अजीव की प्रज्ञापना है। (१६) प्रयोग पद और (२२) क्रियापद में आश्रव की (२३) कर्म प्रकृतिपद में बन्ध की (३६) समुद्घात पद में केवली समुद्घात की प्ररूपणा में संवर निर्जरा और मोक्ष की, शेष स्थान आदि पदों में कहीं किसी की

દ્રવ્ય રત્નો છે અને શ્રુત તથા વ્રત આદિ ભાવરત્નો છે. દ્રવ્યરત્ન વાસ્તવિક નથી, તેથી અહીં ભાવરત્નો સમજવાના છે. શ્રુતરત્નનો અર્થ છે, શ્રુતરૂપ રત્ન, શ્રુત અને રત્ન એવો અર્થ ન સમજવો જોઇએ.

પ્રજ્ઞાપના કોની કરાય ? એનો ઉત્તર છે–સર્વભાવોની. જીવ અજીવ પુણ્ય પાપ, આશ્રવ, સંવર, બન્ધ, નિર્જરા અને મોક્ષ, આ ભાવો છે. આ પ્રજ્ઞાપના સૂત્ર છત્રીસ પદોમાં છે. તે આ પ્રકારે છે—(૧) પ્રજ્ઞાપના, (૩) બહુ વક્તવ્ય (૫) વિશેષ (૧૧) ચરમ અને (૧૩) પરિણામ આ પાંચ પદોમાં જીવ અને અજીવની પ્રજ્ઞાપના છે. (૧૬) પ્રયોગપદ અને (૨૨) ક્રિયા પદમાં આશ્રવની (૨૩) કર્મપ્રકૃતિ પદમાં બન્ધની (૩૬) સમુદ્ઘાત પદમાં કેવલી સમુદ્ઘાતની પ્રરૂપણામાં સંવર નિર્જરા અને મોક્ષના શેષ સ્થાન વિગેરે પદો

द्रव्यक्षेत्रकालभावानामित्यर्थः, य एतदतिरिक्तत्वेन अन्यस्य प्रज्ञापनीयस्य कस्य चिदभावात्, तत्र प्रज्ञापनापदे (१) जीवाऽजीवद्रव्याणां प्रज्ञापना, स्थानपदे (२) जीवाधारस्य क्षेत्रस्य, स्थिति पदे (३) नारकादि स्थितिप्ररूपणात्, कालस्य शेषपदेषु पुण्यपापसंख्या ज्ञानादि पर्यायव्युत्क्रान्त्युच्छ्वासादीनां भावानां प्रज्ञापनाऽस्तीति भावः इति द्वितीयगाथार्थः। अथ तृतीयगाथामाह-

'अज्झयणमिणं चित्तं सुयरयणं दिट्ठिवायणीसंदं।
जह वन्नियं भगवया अहमवि तह वन्नइस्सामि' ॥३॥ त्ति,

अध्ययनमिनं चित्रं श्रुतरत्नं दृष्टिवादनिःष्यन्दः।
यथावर्णितं भगवता अहमपि तथा वर्णयिष्यामीति,

अन्वयः--दृष्टिवादनिःस्यन्दश्चित्रं श्रुतरत्नमिदम् अध्ययनं भगवता यथावर्णितम् अहमपि तथा वर्णयिष्यामि, इत्यन्वयः,

---

और कहीं किसीकी अथवा सर्व द्रव्य, क्षेत्र, काल, भाव रूप सब भावों की प्ररूपणा है। इनके अतिरिक्त अन्य कोइ प्रज्ञापनीय पदार्थ नहीं। (१) प्रज्ञापना पद में जीव—अजीव द्रव्यों की प्रज्ञापना है, (२) स्थानपद में जीव के आधार क्षेत्र की, (३) स्थितिपद में नारक आदि की स्थिति का निरूपण होने से काल की और शेष पदों में पुण्य पाप संख्या ज्ञानादि पर्याय, व्युत्क्रान्ति, उच्छ्वास आदि भावों की प्रज्ञापना की गई है यह द्वितीय गाथा का अर्थ हुआ ॥ २ ॥

शब्दार्थ—(अज्झयणं) अध्ययन (इणं) यहां (चित्तं) विचित्र—विचित्रता युक्त (सुयरयणं) श्रुत रूपीरत्न (दिट्ठिवायणीसंदं) दृष्टिवाद नामक अंग का निचोड़ (जए) जिस प्रकार (वन्नियं) वर्णित किया है

માં કયાંક કોઇની અને કયાંય કોઇની અથવા સર્વ દ્રવ્ય, ક્ષેત્ર, કાલ ભાવરૂપ બધા ભાવોની પ્રરૂપણા છે. આના સિવાય બીજો કોઇ પ્રજ્ઞાપનીય પદાર્થ નથી. પ્રજ્ઞાપના પદમાં જીવ–અજીવ દ્રવ્યોની પ્રજ્ઞાપના છે. (૨) સ્થાનપદમા જીવના આધાર ક્ષેત્રની (૩) સ્થિતિ પદમા નારક વિગેરેની સ્થિતિનું નિરૂપણ હોવાથી કાળની અને વિશેષ પદોમા પુણ્ય પાપ સ ંખ્યા જ્ઞાનાદિ પર્યાય, વ્યુત્-ક્રાતિ, ઉચ્છવાસ વિગેરે ભાવોની પ્રજ્ઞાપના કરાઇ છે (આ બીજી ગાથાનો અર્થ થયો ॥ ૨ ॥

શબ્દાર્થ–(अज्झयण) અધ્યયન (इण) અહી (चित्त) વિચિત્ર–વિચિત્રતાયુકત, (सुयरयण) શ્રુત રૂપી રત્ન (दिट्ठिवायणीसद) દ્રષ્ટિવાદ નામક અ ગનો નિચોડ

टीका--तत्र इदम्-प्रज्ञापनाख्यम् अध्ययनं वर्तते, एवं चित्रार्थाधिकारयुक्तत्वाच्चित्रम्, श्रुतरत्नम् श्रुतमेव रत्नं श्रुतरत्नम्, दृष्टिवाद निःष्यन्दः-दृष्टिवादस्य-द्वादशाङ्गस्य निःष्यन्दः-निर्झररूपमिव वर्तते इति दृष्टिवादनिःष्यन्दरूपम् यथा वर्णितं-प्रतिपादितम्, भगवता-श्रीमहावीरेण इन्द्रभूति प्रभृति शिष्याणामध्ययनार्थं वर्णितत्वात् अध्ययनं वर्णितमित्युक्तम्, अहमपि तथा-तदनुसारेणैव वर्णयिष्यामि न स्वमनीषिकयेत्याशयः, एतेन कथमस्य छद्मस्थस्य वर्द्धमानस्वामीमहावीरवद् वर्णयितुं सामर्थ्यं भवेदिति? शङ्काऽप्यपास्ता, सामान्येनाभिधेयपदार्थं वर्णनमात्र मुद्दिश्यैव तथाभिधानात् न तु

(भगवया) भगवान ने (अहमवि) मैं भी (तह) उसी प्रकार (वन्नइस्सामि) वर्णन करूंगा ॥३॥

भावार्थ--दृष्टिवाद नामक बारहवें अंग के निचोड रूप तथा विविधता युक्त, श्रुतों में रत्न के समान इस अध्ययन का भगवान ने जिस प्रकार वर्णन किया है, मै भी उसी प्रकार वर्णन करूंगा, अपनी बुद्धि के अनुसार नहीं ॥३॥

टीकार्थ-यह प्रज्ञापना नामक अध्ययन विविध अधिकारों से युक्त होने के कारण चित्र है, श्रुतरत्न है और दृष्टिवाद नामक बारहवें अंग का निचोड है। इस अध्ययन का भगवान महावीर ने अपने इन्द्रभूति आदि शिष्यों को जैसा अर्थ निरूपित किया है, मैं भी उसके अनुसार ही वर्णन करूंगा, अपनी मति से नहीं। इस कथन से इस शंका का भी समाधान हो गया कि छद्मस्थ, वर्द्धमान महावीर स्वामी के समान वर्णन करने में समर्थकैसे हो सकता है? सामान्य रूप से

(जह) જેવી રીતે (वण्णियं) વર્ણવ્યું છે (भगवया) ભગવાને (अहमवि) હું પણ (तह) તે પ્રમાણે (वन्नइस्सामि) વર્ણન કરીશ ॥ ૩ ॥

ભાવાર્થ—દ્રષ્ટિવાદ નામક બારમા અંગના નિચોડરૂપે, તેમજ વિવિધતાઓથી યુકત શ્રુતોમા રત્ન સરખા આ અધ્યયનનું ભગવાને જે રીતે વર્ણન કર્યું છે હું પણ તેવીજ રીતે વર્ણન કરીશ. મારી બુદ્ધિના અનુસાર નહી

ટીકાર્થ—આ પ્રજ્ઞાપના નામનું અધ્યયન વિવિધ અધિકારોથી યુકત હોવાને કારણે ચિત્ર છે, શ્રુતરત્ન છે અને દૃષ્ટિવાદ નામના બારમા અંગનો નિચોડ છે. આ અધ્યયનનો ભગવાન મહાવીરે પોતાના ઇન્દ્રભૂતિ વિગેરે શિષ્યો આગળ જેવો અર્થ નિરૂપણ કર્યો છે, હું પણ તેના અનુસાર જ વર્ણન કરીશ, મારી બુદ્ધિથી નહીં. આ કથનથી આ શંકાનું પણ સમાધાન થઇ ગયું કે છદ્મસ્થ વર્ધમાન મહાવીર સ્વામીના સમાન વર્ણન કરવામાં સમર્થ કેવી રીતે થઇ શકે ? સામાન્ય

स्वपौढ्या इति भावः, न चास्याः प्रज्ञापनाया अध्ययनरूपत्वे आदौ अनुयोगादि द्वारोपन्यासोऽपि आवश्यकत्वात् कथं न क्रियते इति वाच्यम्, नन्द्युत्तराध्ययनादिषु तथाऽदर्शनेन अध्ययनादौ उपक्रमाद्युपन्यासस्य अवश्यकरणे नियमाभावादिति भावः, अस्याश्च प्रज्ञापनायां षट्त्रिंशत्पदानि सन्ति, पदं प्रकरणम् अर्थाधिकारः, इति समानपर्यायाः, तानि च षट्त्रिंशत् पदानि अधो निर्दिष्टानि अवसेयानि-'पन्नवणा १, ठाणाइं २, बहुवत्तव्व ३, ठिई ४, विसेसाय५ वक्कंती ६,ऊसासो ७, सन्ना ८. जोणीय ९, चरिमाइं १०, ॥४॥ भासा ११, सरीर १२, परिणाम १३, कसाए १४, इंदिए १५, पओगेय १६, लेसा १७, कायठिईया १८, सम्मत्ते १९, अंतकिरियाय २० ॥५॥ ओगाहण सण्ठाणा २१, किरिया २२, कम्मे २३, इयावरे ५॥ (कम्मस्स) बंधए २४, (कम्मस्स) वेदए २५, वेदस्स बंधए २६, वेयवेयए आहारे २८, उवओगे ३९, पासणया ३०,

---

अभिधेय पदार्थों के वर्णन मात्र को उद्देशक करके ही ऐसा कहा है। अपनी प्रौढता प्रकट करने को नहीं।

प्रज्ञापना अध्ययन रूप है तो इसकी आदि में अनुयोगद्वार आदि का कथन करना आवश्यक था, वह क्यों नहीं किया गया ! ऐसा नहीं कहना चाहिए क्योंकि नन्दी आदि अध्ययनों में भी अनुयोगद्वारों का कथन नहीं देखा जाता। इससे सिद्ध होता है कि अध्ययन के आदि में उपक्रम आदि अनुयोग द्वारों का कथन आवश्यक नहीं है।

प्रज्ञापना में छत्तिस पद हैं। पद का अर्थ है प्रकरण या अर्थाधिकार। वे छत्तीस पद इस प्रकार है—

(१) प्रज्ञापना, क्योंकि यह पद प्रज्ञापना विषयक पद्य को लेकर

રૂપે અભિધેય પદાર્થોના વર્ણન માત્રને ઉદ્દેશીનેજ એમ કહ્યું છે. પોતાની પ્રૌઢતા પ્રગટ કરવા માટે નહીં.

પ્રજ્ઞાપના અધ્યયન રૂપ છે તો તેની આદિમાં (अनुयोगद्वार) વિગેરેનું કથન કરવું આવશ્યક હતુ, તે કેમ ન કરવામાં આવ્યું ? એમ ન કહેવું જોઇએ કેમકે નન્દી આદિ અધ્યયનોમાં પણ અનુયોગદ્વારોનું કથન જોવામા નથી આવતુ. એનાથી સિદ્ધ થાય છે કે અધ્યયનની શરૂઆતમાં ઉપક્રમ વિગેરે અનુયોગ દ્વારોનું કથન આવશ્યક નથી.

પ્રજ્ઞાપનામાં છત્રીસ પદ છે. પદનો અર્થ છે પ્રકરણ વા અર્થાધિકાર તે છત્રીસ પદો આ રીતે છે—(૧) પ્રજ્ઞાપના, કેમકે આ પદ પ્રજ્ઞાપના વિષયક

सन्नि ३१, संजमे चेव ३२, ।२७॥६। ओही ३३, पवियारण ३४, वेदणाय ३५, तत्तो समुग्घाए ३६॥७॥ तत्र प्रथमं पदं–प्रकरणं प्रज्ञापनाविषयकं प्रश्नमाश्रित्य प्रवृत्तत्वात् प्रज्ञापना १, एवं द्वितीयं पदं–प्रकरणं स्थानानि २, तृतीयं पदं वहुवक्तव्यम् ३, चतुर्थम् पदं स्थितिः ४, पञ्चमं पदं विशेषाख्यम् षष्ठं पदं व्युत्क्रान्तिः–गर्भप्राप्तिः व्युत्क्रान्ति लक्षणार्थाधिकारयुक्तत्वात् ६, सप्तमं पदम् उच्छ्वासः ७, अष्टमं पदं संज्ञा ८; नवमं पदं योनिः ९; दशमं पदं चरमाणीति चरमाणीति प्रश्नमधिकृत्य प्रवृत्तत्वात् १०, एकादशं पदं भाषा ११, द्वादशं पदं शरीरम् १२, त्रयोदशं पदं परिणामः १३. चतुर्दशं पदं कषायः १४, पञ्चदशं पदं पदमिन्द्रियम् १५. षोडशं पदं प्रयोगः १६, सप्तदशं पदं लेश्या १७, अष्टादशं पदं कायस्थितिः १८ एकोनविंशतितमं पदं सम्यक्त्वम् १९, विंशतितमं पदम् अन्तक्रिया २० एकविंशतितमं पदम् अवगाहना स्थानम् २१ द्वाविंशतितमं पदं क्रिया २२. त्रयोविंशतितमं पदं कर्म २३, चतुर्विंशतितमं पदं कर्मणो वन्धकः २४ तस्मिन् प्रकरणे यथा खलु जीवः कर्मणो वन्धको भवति तथा प्ररूपणात् कर्मवन्धक इति नाम कृतम्, एवमेव पञ्चविंशतितमं पदं कर्मवेदकः २५, षड्विंशतितमं पदं वेदस्य वन्धक इति २६; वेदयते–अनुभवतीति.

आरंभ हुआ है। (२) स्थान (३) वहुवक्तव्य (४) स्थिति (५) विशेष (६)व्युत्क्रांति (उपपात निवारणादि) (७) उच्छवास (८) संज्ञा (९) योनि (१०) चरमाणि। क्योंकि यह पद 'चरमाणि' इस प्रश्न को लेकर आरंभ हुआ है' (११) भाषा (१२) शरीर (१३) परिणाम (१४) कषाय (१५)इन्द्रिय (१६) प्रयोग (१७) लेश्या (१८) कायस्थिति (१९) सम्यक्त्व (२०) अन्तक्रिया (२१) अवगाहना संस्थान (२२) क्रिया (२३) कर्म (२४) कर्म वंधक क्योंकि इस प्रकरण में वतलाया गया है कि जीव इस प्रकार कर्म का वंध कर्त्ता होता है, इसी प्रकार (२५) कर्मवेदक (२६) वेद-वन्धक इसमें वतलाया गया है कि कितनी प्रकृतियो का वेदन करता हुआ जीव कितनी प्रकृतियों का वंध करता है (२७ वेद वेदक

પદને લઈને આરંભ થયેા છે. (૨) સ્થાન (૩) બહુવક્તવ્ય (૪) સ્થિતિ (૫) વિશેષ (૬) વ્યુત્ક્રાંતિ (ઉપપાત નિવારણ વગેરે) (૭) ઉચ્છવાસ (૮) સંજ્ઞા (૯) યેાનિ (૧૦) ચરમાણિ કેમકે આ પદનેા 'चरमाणी' એ પ્રશ્નને લઈને આરંભ થયેા છે (૧૧) ભાષા (૧૨) શરીર (૧૩) પરિણામ (૧૪) કષાય (૧૫) ઇન્દ્રિય (૧૬) પ્રયેાગ (૧૭) લેશ્યા (૧૮) કાય સ્થિતિ (૧૯) સમ્યકત્વ (૨૦) અન્તક્રિયા (૨૧) અવગાહના સંસ્થાન (૨૨) ક્રિયા (૨૩) કર્મ (૨૪) કર્મ બન્ધક, કેમકે એ પ્રકરણમાં બતાવ્યું છે. કે જીવ આ રીતે કર્મનેા બન્ધ કર્તા બને છે. (૨૫) કર્મ વેદન (૨૬) વેદ–બન્ધક એમાં બતાવાયું છે કે કેટલી પ્રકૃતિઓને વેદન કરતેા જીવ કેટલી પ્રકૃતિઓનેા બન્ધ કરે છે (૨૭) વેદ વેદક એમા આ

वेदस्तस्य वन्ध एव वन्धकः, तथा सति कति प्रकृती वेद्यमानस्य कति प्रकृतिनां वन्धो भवतीति तत्र प्ररूप्यते अतस्तद्वेदस्य वन्ध इति नाम कृतम्, सप्तविंशतितमं पदं वेद वेदकः २७, कां प्रकृतिं वेद्यमानः कति प्रकृती वेदयति इत्यर्थप्रतिपादकत्वात् वेदवेदक इति नाम कृतम्, अष्टाविंशतितमं पदम् आहारः २८, आहारप्रतिपादकत्वात्, एकोनत्रिंशत्तमं पदमुपयोगः २९, त्रिंशत्तमं पदं दर्शनता ३०, एकत्रिंशत्तमं पदं संज्ञा ३१, द्वात्रिंशत्तमं पदं संयमः ३२, त्रयस्त्रिंशत्तमं पदम् अवधिः ३३, चतुस्त्रिंशत्तमं पदं प्रविचारणा ३४, पञ्चत्रिंशत्तमं पदं वेदना ३५, षट्त्रिंशत्तमं पदं समुद्घातः ३६, तदेवं रीत्या षट्त्रिंशत्पदानि प्रकरणानि प्रदर्शितानि;

पालानाम्, सप्तानाम् अनीकनाम्, सप्तानाम् अनीकाधिपतीनाम् आधिपत्यम् कुर्वन् पालयन् महताऽहतनाट्यगीतवादिततन्त्रीतलतालत्रुटितघनमृदङ्गपटुप्रवादितरवेण दिव्यान् भोगभोगान् भुञ्जानो विहरति-तिष्ठति इत्याशयः, अथ पर्याप्तापर्याप्तकानतप्राणतदेवानां स्वस्थानादिकं प्ररूपयितुमाह-'कहि णं भंते ! आणयपाणयाणं देवाणं' गौतमः पृच्छति-हे भदन्त ! कुत्र खलु-कस्मिन् प्रदेशे, आनतप्राणतानां देवानाम् 'पज्जत्तापज्जत्ताणं' पर्याप्तापर्याप्तानाम् 'ठाणा पण्णत्ता' स्थानानि स्थित्यपेक्षया स्वस्थानानि प्रज्ञप्तानि-प्ररूपितानि सन्ति ? तदेव विशदयितुं प्रकारान्तरेण पृच्छति-'कहिणं भंते ! आणयपाणया देवा परिवसंति ?' हे भदन्त ! कुत्र खलु-कस्मिन् प्रदेशे, आनतप्राणताः देवाः परिवसन्ति ? भगवान् उत्तरयति 'गोयमा !' हे गौतम ! 'सहस्सारस्स कप्पस्स' सहस्रारस्यकल्पस्य 'उप्पिं' उपरि-ऊर्ध्वप्रदेशे 'सप्पक्खिं सपडिदिसिं जाव उप्पइत्ता' सपक्षम्-समानाः पक्षाः-पूर्वपश्चिमदक्षिणोत्तररूपाः पार्श्वाः यस्मिन् दूरो,

---

पति होकर रहता है। यावत् चार लोकपालों का, सात अनीकों का, सात अनीकाधिपतियों का आधिपत्य करता हुआ, उनका पालन करता हुआ, नाटक, संगीत एवं कुशल वादकों द्वारा वादित वीणा, तल, ताल, त्रुटित, मृदंग आदि वाद्यों की निरन्तर होने वाली मधुर ध्वनि के साथ दिव्य भोगों को भोगता हुआ रहता है।

अब आनत-प्रणत देवों के स्थान आदि की प्ररूपणा की जाती है-

श्री गौतम स्वामी प्रश्न करते हैं-हे भगवन्! पर्याप्त और अपर्याप्त आनत-प्राणत-देवों के स्थान कहां कहे है ? इस प्रश्न को स्पष्ट करने के लिए दोहराते हैं-हे भगवन्! आनत-प्राणत देव किस जगह निवास करते हैं ?

श्री भगवान् उत्तर देते हैं-हे गौतम ! सहस्रार कल्प के ऊपर

પાલોના, સાત અનીકોના, સાત અનીકાધિપતિયોના આધિપત્ય કરતા રહિને તેમનું પાલન કરતા રહીને નાટક સંગીત તેમજ કુશલ વાદકો દ્વારા વાદિત વીણા; તલ, તાલ, ત્રુટિત, મૃદંગ આદિ વાદ્યોના નિરંતર થતા મધુર ધ્વનિની સાથે દિવ્ય ભોગોને ભોગવતા થકા રહે છે.

હવે આનત પ્રાણત દેવોના સ્થાન આદિની પ્રરૂપણા કરાય છે

શ્રી ગૌતમસ્વામી પ્રશ્ન કરે છે-હે ભગવન્! પર્યાપ્ત અને અપર્યાપ્ત આનત પ્રાણત દેવોના સ્થાન કયાં કહ્યા છે ? આ પ્રશ્નને સ્પષ્ટ કરવા માટે દુહરાવે છે-ભગવાન ! આનત પ્રાણત દેવ કઈ જગ્યાએ નિવાસ કરે છે.

શ્રી ભગવાન ઉત્તર દે છે-હે ગૌતમ ! સહસ્રાર કલ્પ ઉપર સમાન દિશામાં

त्पतने तत् सप्रतिदिक् तत् यथा स्यात्तथा, यावद्-बहूनि योजनलक्षाणि, बहुका योजनकोटीः, बहुका योजनकोटिकोटीः ऊर्ध्वम् दूरम् उत्पत्य-उद्-गम्य, 'एत्थ णं' अत्र खलु-उपर्युक्तस्थले 'आणयपाणयनामा' आनतप्राणतनामानौ 'दुवे कप्पा पण्णत्ता' द्वौ कल्पौ प्रज्ञप्तौ, तौ कीदृशौ ? इत्याह-'पाईण पडीणायया' प्राचीनप्रतीचीनायतौ-पूर्वपश्चिमायामौ, 'उदीण दाहिणविच्छिन्ना' उदीचीनदक्षिणविस्तीर्णौ-उत्तरदक्षिणविस्तारौ 'अद्धचंदसंठाणसंठिया' अर्द्धचन्द्रसंस्थानसंस्थितौ-'अच्चिमालीभासरासिप्पभा' अर्चिर्मालिभासराशिप्रभौ, अर्चिषां ज्योतिषां, मालावद् भासां राशिवत् प्रभा ययो स्तौ अर्चिर्मालिभासराशिप्रभौ, 'सेसं जहा सणंकुमारेजाव पडिरूवा' शेषं यथा सनत्कुमारकल्पो वर्णितस्तथा वर्णयितव्यौ, यावद्-सर्वरत्नमयौ अच्छौ श्लक्ष्णौ मसृणौ घृष्टौ मृष्टौ नीरजसौ निर्मलौ निष्पङ्कौ निष्कङ्कटच्छायौ सप्रभौ, सश्रीकौ, सोद्द्योतौ, प्रासादीयौ, दर्शनीयौ, अभिरूपौ, प्रतिरूपौ वर्तते, 'तत्थ णं आणयपाणयदेवाणं' तत्र खलु-उपर्युक्तस्थले, आनतप्राणतदेवानाम् 'चत्तारि विमाणावाससया' चत्वारि विमा-

---

समान दिशा में और समान विदिशा में यावत् बहुत लाख योजन, बहुत करोड योजन, बहुत कोडाकोडी योजन दूर ऊपर जाकर आनत और प्राणत नाम के दो कल्प कहे गए हैं। वे दोनों कल्प पूर्व और पश्चिम में लम्बे हैं, उत्तर और दक्षिण में विस्तीर्ण हैं, अर्धचन्द्र के आकार के हैं, ज्योतियों के समूह तथा तेजोराशि के समान प्रभा वाले हैं, इत्यादि वर्णन सनत्कुमार कल्प के समान कह लेना चाहिए। यावत् वे सर्वरत्नमय हैं, स्वच्छ हैं, चिकने हैं, मृदु हैं, घृष्ट और मृष्ट हैं, नीरज, निर्मल, निष्पंक और निरावरण छाया वाले हैं, प्रभायुक्त, श्रीसम्पन्न, प्रकाशमय, प्रसन्नताजनक, दर्शनीय, अभिरूप और प्रतिरूप हैं। इन कल्पों में आनत-प्राणत देवों के चार सौ विमान हैं। वे

અને સમાન વિદિશામા યાવત્ ઘણા લાખ યોજન, ઘણા કરોડ યોજન, ઘણા કોડા કોડી યોજન દૂર જઇને આનત અને પ્રાણુત નામના બે કલ્પ કહ્યા છે. તે બન્ને કલ્પ પૂર્વ અને પશ્ચિમમાં લાંબા છે. ઉત્તર અને દક્ષિણુમાં વિસ્તીર્ણ છે' અર્ધ ચન્દ્રના આકારના છે, જ્યોતિઓના સમૂહ તથા તેજો રાશિના સમાન પ્રભાવાળા છે, ઇત્યાદિ વર્ણન સનત્કુમાર કલ્પની સમાન કહી લેવું જોઇએ. યાવત્ તેઓ બધા રત્નમય છે, સ્વચ્છ, છે. ચિકણુા છે, મૃદુ છે. ઘૃષ્ટ અને મૃષ્ટ છે, નીરજ, નિર્મળ નિષ્પંક અને નિરાવરણ છાયા વાળા છે. પ્રભાયુક્ત શ્રી સંપન્ન પ્રકાશમય, પ્રસન્નતા જનક, દર્શનીય, અભિરૂપ અને પ્રતિરૂપ છે.

આ કલ્પોમાં આનત પ્રાણુત દેવોના ચારસો વિમાન છે. તે વિમાનો સર્વ-

नावासशतानि 'भवंतीतिमक्खायं' भवन्ति इत्याख्यातम् 'जाव पडिरूवा' यावत्–तानि सर्वरत्नमयानि अच्छानि, श्लक्ष्णानि, मसृणानि, घृष्टानि मृष्टानि नीरजांसि, निर्मलानि, निष्पङ्कानि, निष्कङ्कटच्छायानि, सप्रभाणि सश्रीकाणि, सोद्द्योतानि प्रासादीयानि, दर्शनीयानि अभिरूपाणि, प्रतिरूपाणि सन्ति, 'वडिंसगा जहा सोहम्मे कप्पे' आनतप्राणतकल्पयो रवतंसकाः, यथा सौधर्मकल्पे अशोकादयः पञ्चावतंसकाः प्रतिपादितास्तथा प्रतिपादनीयाः 'नवरं' नवरम्–सौधर्मापेक्षया विशेषस्तु–'मज्झे इत्थ पाणयवडिंसए' मध्ये–अशोकादि चतुरवतंसकमध्ये, अत्र–आनतप्राणतकल्पयोः, प्राणतावतंसको बोध्यः 'ते णं वडिंसगा' ते खलु अशोकादयः पञ्च अवतंसकाः 'सव्वरयणामया' सर्वरत्नमयः 'अच्छा' अच्छाः 'जाव' यावत्–श्लक्ष्णाः, मसृणाः, घृष्टाः, मृष्टाः, नीरजाः, निर्मलाः, निष्पङ्काः 'निष्कङ्कटच्छायाः, सप्रभाः, सश्रीकाः, सोद्द्योताः, प्रासादीयाः, दर्शनीयाः, अभिरूपाः, प्रतिरूपाः सन्ति 'एत्थ णं आणयपाणय देवाणं' अत्र खलु उपर्युक्तस्थले, आनतप्राणतदेवानाम् 'पज्जत्तापज्जत्ताणं'

विमान सर्वरत्नमय, स्वच्छ, चिकने, कोमल, घृष्ट, मृष्ट, नीरज, निर्मल निष्पंक और निरावरण कान्ति वाले हैं। प्रभायुक्त, श्रीसम्पन्न, प्रकाशमय, प्रसन्नताजनक, दर्शनीय, अभिरूप प्रतिरूप, हैं। आनत-प्राणत कल्पों में जो अवतंसक हैं वे सौधर्मकल्प के समान हैं, मगर विशेषता यह है कि यहां अशोकावतंसक आदि चार अवतंसकों के मध्य में प्राणतावतंसक है। ये पांचों अवतंसक सर्वरत्नमय हैं, स्वच्छ हैं, यावत् चिकने, कोमल, घृष्ट, मृष्ट, नीरज, निर्मल, निष्पंक, निरावरण कान्ति वाले. प्रभायुक्त, श्रीसम्पन्न, प्रकाशमय, प्रसन्नताजनक, दर्शनीय, अभिरूप और प्रतिरूप हैं। यहां पर्याप्त और अपर्याप्त आनत-प्राणत देवों के स्वस्थान निरूपण किए गए हैं। वे स्थान

રત્નમય, સ્વચ્છ, ચિકણા, કોમલ, ઘૃષ્ટ, મૃષ્ટ, નીરજ, નિર્મળ, નિષ્પંક, અને નિરાવરણ કાન્તિવાળા છે. પ્રભાયુક્ત, શ્રીસંપન્ન, પ્રકાશમય, પ્રસન્નતાજનક, દર્શનીય, અભિરૂપ અને પ્રતિરૂપ છે. આનત–પ્રાણત કલ્પોમા જે અવતંસક છે તે સૌધર્મકલ્પના સમાન છે, પરન્તુ વિશેષતા આ છે કે અહીં અશોકાવતંસક આદિ ચાર અવતંસકોના મધ્યમા પ્રાણતાવતંસક છે. આ પાચે અવતંસક સર્વરત્નમય છે, સ્વચ્છ છે, યાવત્ ચિકણા, કોમલ, ઘૃષ્ટ, મૃષ્ટ, નીરજ, નિર્મળ, નિષ્પંક, નિરાવરણ કાન્તિવાળા, પ્રભાયુક્ત, શ્રીસંપન્ન, પ્રકાશમય, પ્રસન્નતા જનક, દર્શનીય અભિરૂપ અને પ્રતિરૂપ છે. અહિં પર્યાપ્ત અને અપર્યાપ્ત આનત પ્રાણત દેવોના સ્વસ્થાન નિરૂપણ ઠરેલા છે. તે સ્થાનો, ઉપપાત

पर्याप्तापर्याप्तानाम् 'ठाणा पण्णत्ता' स्थानानि-स्वस्थानानि, प्रज्ञप्तानि-प्ररूपितानि सन्ति, 'तिसु वि लोगस्स असंखेज्जइभागे' त्रिष्वपि स्वस्थानोपपातसमुद्घातलक्षणेषु त्रिष्वपि स्थानेषु विषये लोकस्य असंख्येयभागे-असंख्येयतमे भागे वक्तव्यम्, 'तत्थ णं बहवे आणयपाणय देवा परिवसंति' तत्र खलु-उपर्युक्तस्थले, बहवः आनतप्राणतदेवाः परिवसन्ति 'महिड्ढिया जाव पभासेमाणा' महर्द्धिकाः यावत्-महाद्युतिकाः, महायशसः, महाबलाः, महानुभागाः, महासौख्याः, हारविराजितवक्षसः, कटकत्रुटितस्तम्भितभुजाः, अङ्गदकुण्डलमृष्टगण्डस्तलकर्णपीठधारिणः विचित्रहस्ताभरणाः, विचित्रमालामौलयः, कल्याणकप्रवरवस्त्रपरिहिताः, कल्याणकमाल्यानुलेपनाः, भास्वरबोन्दयः, प्रलम्बवनमालाधराः, दिव्येन वर्णगन्धादिना दशदिश उद्द्योतयन्तः, प्रभासयन्तः, 'ते णं तत्थ' ते खलु आनतप्राणत देवाः, तत्र-उपर्युक्तस्थले, 'साणं साणं विमाणावाससयाणं' स्वेषां स्वेषां विमानावासशतानाम्, 'जाव विहरंति' स्वेषां स्वेषां

स्वस्थान, उपपात और समुद्घात, तीनों अपेक्षाओं से लोक के असंख्यातवें भाग में हैं। वहां बहुत-से आनत एवं प्राणत देव निवास करते हैं। वे महर्द्धिक हैं यावत् प्रभासित करते हैं, अर्थात् महाद्युतिक हैं, महायशस्वी हैं, महाबल हैं, महानुभाग हैं, महासुखसम्पन्न हैं। उनका वक्षस्थल हार से सुशोभित रहता है। उनकी भुजाएं कटकों और त्रुटितों से स्तब्ध रहती हैं। वे अंगद, कुंडल एवं कर्णपीठ के धारक होते हैं। हाथों में विचित्र आभूषण पहनते हैं। उनका मुकुट अद्भुत मालामय होता है। वे कल्याणकारी अत्युत्तम वस्त्रों का परिधान करते हैं। कल्याणकारी उत्तम माला और अनुलेपन के धारक होते हैं। अपने दिव्य वर्ण गंध आदि से दशों दिशाओं को प्रकाशित और प्रभासित करते रहते हैं।

અને સમુદ્ઘાત તેમજ સ્વસ્થાન ત્રણે અપેક્ષાથી લોકના અસંખ્યાતમા ભાગમાં છે. ત્યાં ઘણા બધા આનત-તેમજ પ્રાણત દેવ નિવાસ કરે છે. તેઓ મહર્ધિક છે યાવત્ પ્રભાસિત કરે છે. અર્થાત મહાદ્યુતિક છે. મહાયશસ્વી છે. મહાબળ છે. મહાનુભાગ છે, મહાસુખ સંપન્ન છે; તેમના વક્ષસ્થળ હારથી સુશોભિત રહે છે, તેમની ભુજાઓ કટકો અને ત્રુટિતોથી સ્તબ્ધ રહે છે. તેઓ અંગદ, કુંડલ તેમજ કર્ણપીઠના ધારક હોય છે. હાથોમાં વિચિત્ર આભૂષણ પહેરે છે, તેમના મુગટ અદ્ભુત માલામય હોય છે. તેઓ કલ્યાણકારી અત્યુત્તમ વસ્ત્રોનું પરિધાન કરે છે. કલ્યાણકારી ઉત્તમમાળા અને અનુલેપના ધારક હોય છે. પોતાના દિવ્ય વર્ણ ગંધ આદિથી દશેદિશાઓને પ્રકાશિત અને પ્રભાસિત કરતા રહે છે.

सामानिकसहस्राणाम्, स्वासां स्वासाम् आत्मरक्षकदेवसाहस्रीणाम्, स्वेषां स्वेषां लोकपालानाम्, स्वेषां स्वेषाम् अनीकानाम्, स्वेषां स्वेषाम् अनीकाधिपतीनाम् आधिपत्यम् पौरपत्यम्, स्वामित्वम्, भर्तृत्वम्, महत्तरकत्वम् आज्ञेश्वरसेनापत्यम् कारयन्तः पालयन्तो महताऽहतनाट्यगीतवादिततन्त्रीतलतालत्रुटितघनमृदङ्ग-पटुप्रवादितरवेण दिव्यान् भोगभोगान् भुञ्जानाः विहरन्ति-तिष्ठन्ति, 'पाणए इत्थ देविंदे देवराया' प्राणतः अत्र-आनतप्राणतकल्पयोः, देवेन्द्रो देवराजः 'परिवसइ' परिवसति, 'जहा सणंकुमारे' यथा सनत्कुमारो देवेन्द्रो देवराजः प्रतिपादितस्तथा प्रतिपादनीयः, किन्तु 'नवरं' नवरम्-सनत्कुमारापेक्षया विशेषस्तु 'चउण्हं विमाणावाससयाणं' चतुर्णां विमानावासशतानाम् 'वीसाए सामाणिय-साहस्सीणं' विंशतेः सामानिकसाहस्रीणाम् 'असीईए आयरक्खदेवसाहस्सीणं' अशीतेः आत्मरक्षकदेवसाहस्रीणाम् 'अन्नेसिं च बहूणं जाव विहरइ' अन्येषां च बहूनाम् यावद्-आनतप्राणतदेवानाम् आधिपत्यं पौरपत्यम् कुर्वन् पालयन् महताऽहतनाट्यगीतवादितरवेण दिव्यान् भोगभोगान् भुञ्जानो विहरति-तिष्ठति, अथ पर्याप्तापर्याप्तकारणाच्युतदेवानां स्थानादिकं प्ररूपयितुमाह-'कहि

इन आनत और प्राणत कल्पों में प्राणत नामक देवेन्द्र देवराज है। उसका वर्णन सनत्कुमारेन्द्र के समान समझना चाहिए, किन्तु विशेषता यह है कि प्राणतेन्द्र चार सौ विमानों का, बीस हजार सामानिक देवों का, अस्सी हजार आत्मरक्षक देवों का तथा अन्य बहुत-से आनत-प्राणत कल्पों के देवों का अधिपतित्व, अग्रेसरत्व करता हुआ, उनका पालन करता हुआ नाटक, संगीत, और कुशल वादकों द्वारा वादित वीणा, तल, ताल, त्रुटित, मृदंग आदि वाद्यों की निरन्तर होने वाली ध्वनि के साथ दिव्य भोग्य भोगों को भोगता रहता है।

अब पर्याप्त-अपर्याप्त आरण-अच्युत देवों के स्थानादि की प्ररू-पणा की जाती है-

---

આ આનત અને પ્રાણુત કલ્પોમાં પ્રાણુત નામના દેવેન્દ્ર દેવરાજ છે. તેમનું વર્ણન સનત્કુમારેન્દ્રના સમાન સમજવું જોઈએ, પરન્તુ વિશેષતા આ છે કે પ્રાણુતેન્દ્ર ચારસો વિમાનોના વીસ હજાર સામાનિક દેવોના એંસી હજાર આત્મરક્ષક દેવોના તથા અન્ય ઘણુ બધા આનત પ્રાણુત કલ્પોના દેવોનું અધિ પતિત્વ, અગ્રેસરત્વ, કરતા થકા પાલન કરતા કરતા નાટક, સંગીત, અને કુશલ વાદકો દ્વારા વાદિત વીણા તલ, તાલ, ત્રુટિત મૃદંગ આદિ વાદ્યોના નિરન્તર થનારા ધ્વનિની સાથે દિવ્ય ભોગ્યભોગોને ભોગવતા રહે છે.

હવે પર્યાપ્ત-અપર્યાપ્ત આરણ-અચ્યુત દેવોના સ્થાનાદિની પ્રરૂપણા કરાય છે

णं भंते ! आरणाच्चुयाणं देवाणं पज्जत्तापज्जत्ताणं' गौतमः पृच्छति-हे भदन्त ! कुत्र खलु-कस्मिन् स्थले आरणाच्युतानाम् देवानां पर्याप्तापर्याप्तानाम् 'ठाणा पण्णत्ता' स्थानानि-स्थित्यपेक्षया स्वस्थानानि प्रज्ञप्तानि-प्ररूपितानि सन्ति ? तदेव विशदयितुं प्रकारान्तरेण पृच्छति-'कहि णं भंते ! आरणाच्चुया देवा परिवसंति' हे भदन्त ! कुत्र खलु-कस्मिन स्थले, आरणाच्युता देवाः परिवसन्ति? भगवान् उत्तरयति-'गोयमा' हे गौतम ! 'आणयपाणयाणं कप्पाणं उप्पिं' आनतप्राणतयोः कल्पयोरुपरि ऊर्ध्वभागे, 'सपक्खिं सपडिदिसिं' सपक्षम्-समानाः पक्षाः-पूर्वपश्चिमदक्षिणोत्तररूपाः पार्श्वाः यस्मिन दूरोत्पतने तत् सपक्षम्, सप्रतिदिक्-समानाः प्रतिदिशः-विदिशो यस्मिन दूरोत्पतने तत् सप्रतिदिक्, तद्यथा स्यात्तथा बहूनि योजनलक्षाणि बहुका योजनकोटिकोटीः ऊर्ध्वम् दूरमुत्पत्य-उद्गम्य, 'एत्थ णं आरणच्चुया नामं दुवे कप्पा पण्णत्ता' अत्र खलु-उपर्युक्तस्थले, आरणाच्युतौ नाम द्वौ कल्पौ प्रज्ञप्तौ, तौ कीदृशौ इत्याह-

---

श्री गौतम स्वामी प्रश्न करते हैं-हे भगवन् ! पर्याप्त और अपर्याप्त आरण-अच्युत देवों के स्थान कहां कहे हैं ? अर्थात् हे भगवन् ! आरण-अच्युत देव कहां निवास करते हैं ?

श्री भगवान् उत्तर देते हैं-हे गौतम ! आनत-प्राणत नामक कल्पों के ऊपर समान दिशा में और समान विदिशा में बहुत लाख योजन, बहुत करोड योजन, यहां तक कि बहुत कोडाकोडी योजन ऊपर जाकर आरण और अच्युत नामक दो कल्प कहे गए हैं । वे कल्प पूर्व-पश्चिम में लम्बे हैं, उत्तर दक्षिण में विस्तृत (चौडे) हैं, अर्धचन्द्र के आकार के हैं, ज्योतिषों के समूह एवं तेजोराशि के समान आभा वाले हैं । उनकी लम्बाई और चौडाई असंख्यात कोडाकोडी योजन

શ્રી ગૌતમસ્વામી પ્રશ્ન પૂછે છે-ભગવન્ ! પર્યાપ્ત અને અપર્યાપ્ત આરણ અચ્યુત દેવોના સ્થાન કયા કહ્યા છે ? અર્થાત્ હે ભગવન્ ! આરણ અચ્યુત દેવ કયાં નિવાસ કરે છે ?

શ્રી ભગવાન ઉત્તર દે છે-હે ગૌતમ ! આનત પ્રાણત નામના કલ્પોના ઊપર સમાન દિશામાં અને સમાન વિદિશામાં ઘણા લાખ યોજન, ઘણા કરોડ યોજન, ત્યા સુધી કે ઘણા કોડાકોડી યોજન ઊંપર દૂર જઇને આરણ અને અચ્યુત નામક બે કલ્પ કહેલા છે ને કલ્પ પૂર્વપશ્ચિમમા લાબા છે, ઉત્તર દક્ષિણમાં વિસ્તૃત છે. અર્ધ ચન્દ્રના આકારના છે. જ્યોતિષોના સમૂહ તેમજ તેજો રાશિના સમાન આભાવાળા છે. તેમની લબાઇ અને પહોળાઇ અસંખ્યાત કોડા કોડી યોજનની છે, અને પરિધિપણ અસંખ્યાત કોડા કોડી યોજનની છે, તે કલ્પ

'पाईणपडीणायया' प्राचीनप्रतीचीनायतौ-पूर्वपश्चिमायामौ, 'उदीण दाहिण-विच्छिण्णा' उदीचीन दक्षिणविस्तीर्णौ, उत्तरदक्षिणविस्तारौ 'अद्धचंदसंठाण-संठिया' अर्द्धचन्द्रसंस्थानसंस्थितौ, 'अच्चिमाली भासरासिवण्णाभा' अर्चिर्मालाभासराशिवर्णाभौ-अर्चिषां ज्योतिषां मालावत्, भासां राशिवच्च वर्णाभा-वर्ण-कान्तिर्ययोस्तौ अर्चिर्माला भासराशिवर्णाभौ. 'असंखिज्जाओ जोयणकोडा-कोडीओ' असंख्येयाः योजनकोटिकोटयः 'आयामविक्खंभेणं' आयामविष्कम्भेण -दैर्घ्यविस्तारेण, 'असंखिज्जाओ जोयणकोडाकोडीओ' असंख्येयाः योजन-कोटिकोटयः 'परिक्खेवेणं' परिक्षेपेण परिधिना, 'सव्वरयणामया' सर्वरत्नमयौ -सर्वात्मना कात्स्न्र्येन रत्नमयौ 'अच्छा' अच्छौ-स्वच्छौ 'सण्हा' श्लक्ष्णौ, 'लण्हा' मसृणौ, 'घट्ठा' घृष्टौ, शाणया सुवर्णादिवत् घृष्टौ इव. 'मट्ठा' मृष्टौ-मृष्टीकृतौ, 'नीरया' नीरजसौ-रजोरहित्वेन उज्वलौ, 'निम्मला' निर्मलौ 'निप्पंका' निष्पङ्कौ कर्दमरहितौ 'निक्कंकडच्छाया' निष्कङ्कटच्छायौ-निष्कङ्कटत्वेन कवचराहि-त्येन छायया कान्त्या विशिष्टौ 'सप्पभा' सप्रभौ-प्रभाविशिष्टौ, 'सस्सिरिया' सश्रीकौ-श्रिया परमशोभया सहितौ सश्रीकौ, 'सउज्जोया' सोद्द्योतौ, उद्द्योतेन प्रकाशेन सहितौ सोद्द्योतौ, 'पासाईया' प्रासादीयौ-प्रसादाय प्रसत्तये हितौ परमानन्दजनकौ 'दरिसणिज्जा' दर्शनीयौ-दर्शनयोग्यौ 'अभिरूवा' अभिरूपौ, 'पडिरूवा' प्रतिरूपौ स्तः, 'एत्थ णं' अत्र खलु-उपर्युक्तस्थले 'आरणच्चुयाणं' आरणाच्युतानाम् 'देवाणं' देवानाम् 'तिन्नि विमाणावाससया' त्रीणि विमाना-वासशतानि 'भवंतीति मक्खायं' भवन्ति इत्याख्यातं महावीरेण मया, अन्यैश्च तीर्थकृद्भिः, 'ते णं विमाणा' तानि खलु विमानानि 'सव्वरयणामया' सर्वरत्न-

---

की है और परिधि भी असंख्यात कोडाकोडी योजन की है। वे कल्प सर्वरत्नमय हैं, स्वच्छ हैं, चिकने हैं, मृदु हैं, घृष्ट हैं, मृष्ट हैं, नीरज, निर्मल, निष्पंक और निरावरण कान्ति वाले हैं, प्रभायुक्त. श्रीसम्पन्न, प्रकाशमय, प्रसन्नताप्रद, दर्शनीय, अभिरूप और प्रतिरूप हैं। इन कल्पों में आरण-अच्युत देवों के तीन सौ विमान हैं, ऐसा मैंने तथा अन्य तीर्थंकरों ने कहा है।

वे विमान सर्वरत्नमय हैं, स्वच्छ हैं, चिकने हैं, कोमल हैं, घृष्ट

સર્વ રત્નમય છે, સ્વચ્છ છે, ચિકણા છે, મૃદુ છે, ઘૃષ્ટ છે, મૃષ્ટ છે, નીરજ છે, નિર્મળ, નિષ્પંક અને નિરાવરણ કાન્તિવાળા છે, પ્રભાયુક્ત, શ્રીસંપન્ન, પ્રકાશમય, પ્રસન્નતાપ્રદ, દર્શનીય, અભિરૂપ અને પ્રતિરૂપ છે. આ કલ્પોમાં આરણ અચ્યુત દેવોના ત્રણસો વિમાન છે, એમ મેં તથા અન્ય તીર્થંકરોએ કહ્યું છે.

તે વિમાનો સર્વરત્નમય છે, સ્વચ્છ છે, ચિકણા છે, કોમલ છે, ઘૃષ્ટ

मयानि-सर्वात्मना कात्स्न्र्येन रत्नमयानि 'अच्छा' अच्छानि-स्वच्छानि 'सण्हा' श्लक्ष्णानि, 'लण्हा' मसृणानि 'घट्ठा' घृष्टानि 'मट्ठा' मृष्टानि 'नीरया' नीरजांसि, रजोरहितानि 'निम्मला' निर्मलानि 'निप्पंका' निष्पङ्कानि, 'निक्कंकटच्छाया' निष्कङ्कटच्छायानि, निष्कङ्कटा-कवचरहिता, छाया-कान्तिर्येषां तानि तथाविधानि, 'सप्पभा' सप्रभाणि-प्रभया कान्त्या सहितानि सप्रभाणि, 'सस्सिरिया' सश्रीकाणि, श्रिया परमशोभया सहितानि सश्रीकाणि, 'सउज्जोया' सोद्द्योतानि, उद्द्योतेन प्रकाशेन सहितानि, सोद्द्योतानि 'पासाईया' प्रासादीयानि-प्रसादाय प्रसत्तये परमानन्दाय हितानि योग्यानि वा प्रासादीयानि, 'दरिसणिज्जा' दर्शनीयानि-दर्शनयोग्यानि 'अभिरूवा' अभिरूपाणि, 'पडिरूवा' प्रतिरूपाणि सन्ति, 'तेसि णं विमाणाणं कप्पाणं' तेषां विमानानां कल्पानाम् 'बहुमज्झदेसभाए' बहुमध्यदेशभागे-अत्यन्तमध्यप्रदेशे 'पंच वडिंसया पण्णत्ता' पञ्चावतंसकाः प्रज्ञप्ताः, 'तं जहा' तद्यथा 'अंकवडिंसए' अङ्कावतंसकः 'फलिहवडिंसए' स्फटिकावतंसकः 'रयणवडिंसए' रत्नावतंसकः 'जायरूववडिंसए' जातरूपावतंसकः 'मज्झे एत्थ अच्चुयवडिंसए' मध्ये-उक्तचतुष्टयावतंसकमध्ये इत्यर्थः, अत्र-आरणाच्युतकल्पयोः, अच्युतावतंसको बोध्यः, 'ते णं वडिंसया सव्वरयणामया जाव पडिरूवा' ते खलु पञ्च अङ्कादयोऽवतंसकाः सर्वरत्नमयाः-सर्वात्मना कात्स्न्र्येन रत्नमयाः, यावत्-अच्छाः, स्वच्छा इत्यर्थः, श्लक्ष्णाः, मसृणाः, घृष्टाः, मृष्टाः, नीरजसः, निर्मलाः, निष्पङ्काः, निष्कङ्कटच्छायाः, सप्रभाः,

और मृष्ट हैं, नीरज निर्मल निष्पंक और निरावरण कान्ति वाले हैं, प्रभायुक्त हैं, श्रीसम्पन्न हैं, प्रकाशोपेत हैं, प्रासादिक; दर्शनीय, अभिरूप और प्रतिरूप हैं। उन विमानों-कल्पों के एकदम मध्य भाग में पांच अवतंसक कहे गए हैं। वे इस प्रकार हैं-(१) अंकावतंसक (२) स्फटिकावतंसक (३) रत्नावतंसक (४) जातरूपावतंसक और इन चारों के मध्य में, आरण-अच्युत कल्पों में पांचवां (५) अच्युतावतंसक है। ये पांचों अवतंसक सर्वरत्नमय हैं। यावत् प्रतिरूप हैं, अर्थात् स्वच्छ हैं, चिकने हैं, मृदु हैं, घृष्ट हैं, मृष्टहैं, नीरज हैं,

અને મૃષ્ટ છે, નીરજ, નિર્મળ, નિષ્પંક અને નિરાવરણ કાન્તિવાળાં છે, પ્રભાયુક્ત છે, શ્રીસંપન્ન છે, પ્રકાશોપેત છે, પ્રાસાદિક, દર્શનીય, અભિરૂપ અને પ્રતિરૂપ છે, તે વિમાનો-કલ્પોના એક દમ મધ્યભાગમાં પાંચ અવતંસક કહેલા છે. તેઓ આ પ્રકારે છે-(૧) અંકાવતંસક (૨) સ્ફટિકાવતંસક (૩) રત્નાવતંસક (૪) જાતરૂપાવતંસક (૫) અને આ ચારેની મધ્યમાં આરણ-અચ્યુત કલ્પમાં પાંચમું અચ્યુતાવતંસક છે. આ પાંચે અવતંસક સર્વ રત્નમય છે યાવત્ પ્રતિરૂપ છે, અર્થાત્ સ્વચ્છ છે. ચિકણા છે. મૃદુ છે, ઘૃષ્ટ છે. મૃષ્ટ છે.

सश्रीकाः, सोद्द्योताः, प्रसादीयाः, दर्शनीयाः, अभिरूपाः, प्रतिरूपाः, सन्ति, 'एत्थ णं आरणच्चुयाणं देवाणं' अत्र खलु-उपर्युक्तस्थले, आरणाच्युतानां देवानाम् 'पज्जत्तापज्जत्ताणं' पर्याप्तापर्याप्तानाम् 'ठाणा पण्णत्ता' स्थानानि प्रज्ञप्तानि-प्ररूपितानि सन्ति, 'तिसुवि लोगस्स असंखेज्जइभागे' त्रिष्वपि-स्वस्थानोपपातसमुद्घातलक्षणेषु त्रिष्वपि स्थानेषु विषये लोकस्य असंख्येयभागे असंख्येयतमे भागे वक्तव्यम् 'तत्थ णं बहवे आरणच्चुया देवा परिवसंति' तत्र खलु-उपर्युक्तस्थले बहव आरणाच्युता देवाः परिवसन्ति 'अच्चुए इत्थ देविंदे देवराया परिवसइ' अच्युतः अत्र-आरणाच्युतयोः कल्पयोः देवेन्द्रो देवराजः परिवसति, 'जहा पाणए जाव विहरइ' यथा प्राणतः प्रतिपादितस्तथा अच्युतोऽपि प्रतिपादनीयः, यावत्-महर्द्धिकः, महाद्युतिकः, महाबलः, महानुभागः, महासौख्यः, हारविराजितवक्षाः, कटकत्रुटितस्तम्भितभुजः, अङ्गदकुण्डलमृष्टगण्ड-

---

निर्मल हैं, निष्पंक हैं, निरावरण कान्ति वाले हैं, प्रभायुक्त, श्रीसम्पन्न, प्रकाशमय, प्रसन्नताजनक, दर्शनीय, अभिरूप और प्रतिरूप हैं। इन उपर्युक्त स्थानों में पर्याप्त तथा अपर्याप्त आरण-अच्युत देवों के स्थान प्ररूपित किए गए हैं। ये स्थान तीनों अपेक्षाओं से अर्थात् स्वस्थान, उपपात और समुद्घात की अपेक्षा से लोक के असंख्यातवें भाग में हैं। इन स्थानों में बहुसंख्यक आरण-अच्युत देव निवास करते हैं। यहां अच्युत नामक देवेन्द्र देवराज निवास करता है। उसकी वक्तव्यता प्राणत इन्द्र के सदृश समझनी चाहिए, यावत् वह महर्द्धिक, महाद्युतिक, महायशस्वी, महाबल, महानुभाग और महासुखवान् हैं। उसका वक्षस्थल हार से सुशोभित रहता है। उसकी भुजाएं कटकों और त्रुटितों से स्तब्ध रहती हैं। वह अंगद, कुंडल और गण्ड-

---

નીરજ છે, નિર્મળ છે. નિષ્પંક છે નિરાવરણ કાંન્તિવાળા છે. પ્રભાયુક્ત, શ્રી સંપન્ન, પ્રકાશમય, પ્રસન્નતાજનક, દર્શનીય, અભિરૂપ અને પ્રતિરૂપ છે. આ ઊપર કહેલાં સ્થાનોમાં પર્યાપ્ત તથા અપર્યાપ્ત આરણ-અચ્યુત દેવોના સ્થાન પ્રરૂપિત કરાયેલાં છે. આ સ્થાનો ત્રણે અપેક્ષાઓથી અર્થાત્ સ્વસ્થાન ઉપપાત અને સમુદ્ઘાતની અપેક્ષાએ લોકના અસંખ્યતમા ભાગમા છે. આ સ્થાનોમાં બહુ સંખ્ય આરણ અચ્યુત દેવ નિવાસ કરે છે. આહિ અચ્યુત નામક દેવેન્દ્ર દેવરાજ નિવાસ કરે છે. તેમની વક્તવ્યતા પ્રાણત ઇન્દ્રના સમાન સમજવી જોઇએ, યાવત્ તે મહર્ધિક, મહાદ્યુતિક, મહાયશસ્વી, મહાબલ, મહાનુભાગ અને મહાસુખવાન્ છે. તેમનું વક્ષસ્થળ હારથી સુશોભિત રહે છે. તેમની ભુજાઓ કટકો અને ત્રુટિતોથી સ્તબ્ધ રહે છે. તે અંગદ, કુંડળ, અને ગંડ

स्तलकर्णपीठधारी, विचित्रहस्ताभरणो विचित्रमालामौलिः, कल्याणकप्रवरवस्त्रपरिहितः, कल्याणकप्रवरमाल्यानुलेपनः, भास्वरबोन्दिः, प्रलम्बवनमालाधरो दिव्येन वर्णगन्धादिना दशदिश उद्द्योतयन् प्रभासयन् स्वेषां स्वेषां विमानावासादीनाम् आधिपत्यादिकं कुर्वन् विहरति-तिष्ठति 'नवरं' नवरम्-प्राणतापेक्षया विशेषस्तु 'तिण्हं विमाणावाससयाणं' त्रयाणां विमानावासशतानाम् 'दसण्हं सामाणियसाहस्सीणं' दशानां सामानिकसाहस्रीणाम् 'चत्तालीसाए आयरक्खदेवसाहस्सीणं' चत्वारिंशतः आत्मरक्षकदेवसाहस्रीणाम् 'आहेवच्चं कुव्वाणे जाव विहरइ' आधिपत्यम्, पौरपत्यम् कुर्वन् यावत्-पालयन महताऽहतनाट्यगीतवादिततलतालत्रुटितघनमृदङ्गपटुप्रवादितरवेण दिव्यान् भोगभोगान् भुञ्जानो विहरति-निष्ठति, अथ द्वादशवैमानिकदेवविमानसंख्या संग्राहकगाथाद्वयमाह-

---

स्थल को मर्षण करने वाले कर्णपीठ का धारक है। हाथों में अद्भुत आभूषण पहनता है। उसका मुकुट मालामय है। कल्याणकारी एवं अत्युत्तम वस्त्रों का परिधान करता है। कल्याणकारी एवं उत्तम माला तथा अनुलेपन को धारण करता है। उसकी देह देदीप्यमान होती है। लम्बी वनमाला का धारक है। अपने दिव्य वर्ण-गंध आदि से दशों दिशाओं को प्रकाशित और प्रभासित करता हुआ अपने विमानावासों आदि का आधिपत्य आदि करता हुआ रहता है। प्राणतेन्द्र, से अच्युतेन्द्र में विशेषता यह है कि अच्युतेन्द्र तीन सौ विमानों का, दस हजार सामानिक देवों का, चालीस हजार आत्मरक्षक देवों का अधिपतित्व, अग्रेसरत्व आदि करता हुआ, नाटक, गीत तथा वीणा, तल, ताल, त्रुटित एवं मृदंग आदि की मधुर ध्वनि के साथ दिव्य भोगों को भोगता हुआ रहता है।

अब बारहों कल्पों में विमानों की संख्या की संग्रहणी गाथाएं

સ્થળને મર્ષણ કરનારા કર્ણપીઠના ધારક છે. હાથોમાં અદ્ભુત આભૂષણ પહેરે છે. તેમનો મુગટ માલામય છે. તેઓ કલ્યાણકારી તેમજ અત્યુત્તમ વસ્ત્રોનું પરિધાન કરે છે. કલ્યાણકારી તેમજ ઉત્તમ માળા તથા અનુલેપનને ધારણ કરે છે. તેમના દેહ દેદીપ્યમાન હોય છે. લાંબી વનમાળાના ધારક છે. પોતાના દિવ્ય વર્ણ-ગંધ આદિથી દશે દિશાઓને પ્રકાશિત અને પ્રભાસિત કરતા થકા રહે છે. પ્રાણતેન્દ્રથી અચ્યુતેન્દ્રમાં વિશેષતા આ છે કે અચ્યુતેન્દ્ર ત્રણસો વિમાનોના દશ હજાર સામાનિક દેવોના, ચાલીસ હજાર આત્મરક્ષક દેવોના અધિપતિત્વ, અગ્રેસરત્વ, આદિ કરતા રહિને નાટક, ગીત તથા વીણા, તલ, તાલ, ત્રુટિત તેમજ મૃદંગ આદિના મધુરધ્વનિ સાથે દિવ્ય ભોગોને ભોગવતા રહે છે.

'बत्तीस अट्ठवीसा बारस अट्ठचउरो' द्वात्रिंशद् अष्टाविंशतिः, द्वादश अष्टचत्वारि, 'सयसहस्सा' शतसहस्राणि, 'पन्नाचत्तालीसा' पञ्चाशत् चत्वारिंशद् 'छच्च-सहस्सा सहस्सारे' षट्च सहस्राणि सहस्रारे ॥१४६॥ 'आणयपाणय कप्पे' आनत-प्राणतकल्पे 'चत्तारि सयाऽऽरणच्चुए तिन्नि' चत्वारि शतानि, आरणाच्युतयोस्त्रीणि शतानि 'सत्त विमाणसयाइं चउसु वि एएसु कप्पेसु' सप्त विमानशतानि चतुर्ष्वपि एतेषु-उपर्युक्तेषु आनतप्राणतारणाच्युतेषु कल्पेषु भवन्ति इत्याशयः, 'सामाणियसंगहणीगाहा' अथ सामानिकसंग्रहणीगाथामाह-'चउरासीई असीई बावत्तरी सत्तरी य सट्ठी य' चतुरशीतिः सामानिकसहस्राणि सौधर्मेन्द्रस्य, अशीतिः सामानिकसहस्राणि ईशानेन्द्रस्य, द्वासप्ततिः सामानिक-सहस्राणि सनत्कुमारेन्द्रस्य, सप्ततिश्च सामानिकसहस्राणि माहेन्द्रदेवराजस्य, षष्टिश्च सामानिकसहस्राणि ब्रह्मलोकेन्द्रस्य, 'पन्ना चत्तालीसा तीसा वीसा दस-सहस्सा' पञ्चाशत् सामानिकसहस्राणि लान्तकेन्द्रस्य, चत्वारिंशत् सामानिकसह-स्राणि महाशुक्रेन्द्रस्य, त्रिंशत् सामानिकसहस्राणि सहस्रारेन्द्रस्य, विंशतिः सामा निकसाहस्राणि आनतप्राणतेन्द्रस्य, दश सामानिकसहस्राणि आरणाच्युतेन्द्रस्य,

कहते हैं-बत्तीस लाख, अट्ठाईस लाख, बारह लाख, आठ लाख, चार लाख, पचास हजार, चालीस हजार और छह हजार सहस्रार कल्प में, आनत-प्राणत कल्प में चार सौ तथा आरण-अच्युत कल्प में तीन सौ विमान हैं। इन अन्तिम चार कल्पों में सात सौ विमान होते हैं। यह अनुक्रम से बारह कल्पों की विमान संख्या है।

अब सामानिक देवों की संग्रहणी गाथा कहते हैं-सौधर्मकल्प में चौरासी हजार, ईशान कल्प में अस्सी हजार, सनत्कुमार कल्प में बहत्तर हजार, माहेन्द्र कल्प में सत्तर हजार, ब्रह्मलोक में साठ हजार, लान्तक में पचास हजार, महाशुक्र में चालीस हजार, सहस्रार में तीस हजार, आनत-प्राणत में बीस हजार, और आरण-अच्युत में दस

હવે બારે કલ્પોના વિમાનોની સંખ્યાની સંગ્રહણી ગાથાઓ કહે છે-
બત્રીસલાખ, અઠ્ઠાવીસલાખ, બારલાખ, આઠલાખ, ચારલાખ, પચાસ હજાર, ચાલીળ હજાર અને છ હજાર, સહસ્રાર કલ્પમા, આનત પ્રાણુત કલ્પમાં ચાર સો તથા આરણુ-અચ્યુત કલ્પમા ત્રણુસો વિમાન છે આ અન્તિમ ચાર કલ્પોમાં સાતસો વિમાન હોય છે. આ અનુક્રમથી બાર કલ્પોની વિમાન સંખ્યા છે.

હવે સામાનિક દેવોની સંગ્રહણી ગાથા કહે છે-સૌધર્મ કલ્પમાં ચોરાસી હજાર, ઈશાન કલ્પમાં એસી હજાર, સનત્કુમાર કલ્પમાં બોંતેર હજાર; માહેન્દ્ર કલ્પમાં સત્તર હજાર, બ્રહ્મલોકમા સાઠ હજાર, લાન્તકમાં પચાસ હજાર, મહા-

सन्ति ॥१४८॥ 'एए चेव आयरक्खा चउग्गुणा' एते चैव उपर्युक्त संख्याविशिष्टाः आत्मरक्षकाश्चतुर्गुणाः अवसेयाः, अथ शिष्यजनानुग्रहाय अतिदेशेनोक्ता अपि अवतंसकाः, पार्थक्येन प्रतिपाद्यन्ते-सौधर्मकल्पे पूर्वस्यां दिशि अशोकावतंसकः, दक्षिणस्यां सप्तपर्णावतंसकः, पश्चिमायां चम्पकावतंसकः, उत्तरस्यां चूतावतंसकः, मध्ये सौधर्मावतंसको बोध्यः, ईशाने कल्पे पूर्वस्याम् अङ्कावतंसकः, दक्षिणस्यां स्फटिकावतंसकः, पश्चिमायां रत्नावतंसकः, उत्तरस्यां जातरूपावतंसकः, मध्ये ईशानावतंसकः, सनत्कुमारे कल्पे पूर्वादिदिक्षु अशोकसप्तपर्ण-

---

हजार सामानिक देव हैं। आत्मरक्षक देव इनसे चौगुने सर्वत्र समझने चाहिए।

यद्यपि सामान्य रूप से अवतंसकों का निरूपण किया जा चुका है तथापि शिष्य जनों के अनुग्रह के लिए पृथक्-पृथक् रूप से उनका निर्देश किया जाता है। वह इस प्रकार है-सौधर्म कल्प में पूर्व दिशा में अशोकावतंसक है, दक्षिण दिशा में सप्तपर्णावतंसक है, पश्चिम दिशा में चम्पकावतंसक है, उत्तर दिशा में आम्रावतंसक है और चारों के मध्य में सौधर्मावतंसक हैं।

ईशानकल्प में पूर्व में अंकावतंसक, दक्षिण में स्फटिकावतंसक, पश्चिम में रत्नावतंसक, उत्तर में जातरूपावतंसक और मध्य में ईशानावतंसक है।

सनत्कुमार कल्प में पूर्ववत पूर्वादि दिशाओं में अशोकावतंसक, सप्तपर्णावतंसक, चम्पकावतंसक और आम्रावतंसक हैं, मध्य में सनत्कुमारावतंसक है।

શુક્રમા ચાલીસ હજાર, સહસ્રારમા ત્રીસ હજાર; આનત-પ્રાણુતમાં વીસ હજાર અને આરણ-અચ્યુતમાં દશ હજાર સામાનિક દેવ છે. આત્મરક્ષક દેવ તેમનાથી ચાર ગણા સર્વત્ર સમજવા જોઈએ.

જો કે સામાન્ય રૂપથી અવતંસકોનું નિરૂપણ કરી દિધું છે છતાં શિષ્યજનોના અનુગ્રહ માટે પૃથક્-પૃથક્ રૂપથી તેમનો નિર્દેશ કરાય છે. તે આ પ્રકારનો છે સૌધર્મકલ્પમાં પૂર્વ દિશામા અશોકાવતંસક છે. દક્ષિણ દિશામાં સપ્તપર્ણાવતંસક છે, પશ્ચિમ દિશામાં ચપકાવતંસક છે. ઉત્તર દિશામાં આમ્રાવતંસક છે અને ચારેની મધ્યમાં સૌધર્માવતંસક છે.

ઇશાન કલ્પની પુર્વમાં અંકાવતંસક, દક્ષિણુમા સ્ફટિકાવતંસક, પશ્ચિમ દિશામાં રત્નાવતંસક, ઉત્તરમાં જાતરૂપાવતંસક અને મધ્યમાં ઇશાનાવતંસક છે.

સનત્કુમાર કલ્પમાં પુર્વવત્ પૂર્વાદિ દિશાઓમાં અશોકાવતંસક સપ્તપર્ણા

चम्पकचूतावतंसकः, मध्ये सनत्कुमारावतंसकाः, माहेन्द्रे पूर्वादि चतुर्दिक्षु अङ्क-स्फटिक रत्नजातरूपावतंसकाः मध्ये माहेन्द्रावतंसको बोध्यः, ब्रह्मलोके पूर्वादि चतुर्दिक्षु अशोकसप्तपर्णचम्पकचूतावतंसकाः, मध्ये ब्रह्मलोकावतंसकोऽवसेयः लान्तके कल्पे पूर्वादि चतुर्दिक्षु क्रमेण अङ्कस्फटिकरत्नजातरूपावतंसकाः, मध्ये लान्तकावतंसको बोध्यः, महाशुक्रे कल्पे पूर्वादिदिक्षु अशोकसप्तपर्णचम्पकचूता-वतंसकाः मध्ये महाशुक्रावतंसको बोध्यः, सहस्रारे पूर्वादि चतुर्दिक्षु क्रमेण अङ्क-स्फटिकरत्नजातरूपावतंकाः, मध्ये सहस्रारावतंसको बोध्यः, आणतप्राणते कल्पे पूर्वादि चतुर्दिक्षु अशोकसप्तपर्णचम्पकचूतावतंसकाः, मध्ये प्राणतावतंसको

माहेन्द्र कल्प में पूर्व आदि चारों दिशाओं में अंक-स्फटिक-रत्न-जातरूपावतंसक हैं, मध्य में माहेन्द्रावतंसक है।

ब्रह्मलोक में पूर्व आदि चारों दिशाओं में अशोक, सप्तपर्ण, चम्पक और आम्रावतंसक हैं, मध्य में ब्रह्मलोकावतंसक है।

लान्तक कल्प में पूर्व आदि दिशाओं में क्रम से अंकावतंसक, स्फटिकावतंसक, रत्नावतंसक और जातरूपावतंसक है, मध्य में लान्तकावतंसक है।

महाशुक्र कल्प में पूर्व आदि दिशाओं में अशोकावतंसक, सप्तपर्णावतंसक, चम्पकावतंसक और आम्रावतंसक है, मध्य में महाशुक्रावतंसक है।

सहस्रार कल्प में पूर्वादि दिशाओं में अंकावतंसक, स्फटिकावतंसक, रत्नावतंसक और जातरूपावतंसक है, मध्य में सहस्रारावतंसक है।

आनत-प्राणत कल्प में पूर्व आदि दिशाओं में अशोकावतंसक,

વતંસક, ચંપકાવતંસક અને આમ્રાવતંસક કહ્યાં છે, મધ્યમાં સનત્કુમારાવતંસક છે.

માહેન્દ્ર કલ્પમાં પૂર્વ આદિ આ ચારે દિશાઓમાં– અંક, સ્ફટિક રત્ન, જાતરૂપાવતંસક છે, મધ્યમાં માહેન્દ્રાવતંસક છે.

બ્રહ્મલોકમાં પૂર્વ આદિ ચારે દિશાઓમાં અશોકાવતંસક, સ્ફટિકાવતંસક રત્નાવતંસક અને જાતરૂપાવતંસક છે. મધ્યમાં લાન્તકાવતંસક છે.

મહાશુક્ર કલ્પમાં પૂર્વ આદિ દિશાઓમા અશોકાવતંસક, સપ્તપર્ણાવતંસક, ચંપકાવતંસક અને આમ્રાવતંસક છે. મધ્યમાં મહાશુક્રાવતંસક છે

સહસ્રાર કલ્પમાં પૂર્વાદિ દિશાઓના અંકાવતંસક, સ્ફટિકાવતંસક રત્નાવતંસક અને જાતરૂપાવતંસક છે. મધ્યમાં સહસ્રાવતંસક છે.

આનત–પ્રાણત કલ્પમાં પૂર્વ આદિ દિશાઓમા અશોકાવતંસક, સપ્તપર્ણા

विज्ञेयः, अच्युते कल्पे पूर्वादि चतुर्दिक्षु अङ्कस्फटिकरत्नजातरूपावतंसकाः, मध्ये अच्युतावतंसकोऽवसेयः ॥सू० २७॥

मूलम्—कहि णं भंते ! हेट्ठिमगेविज्जगाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ? कहि णं भंते ! हेट्ठिमगेविज्जा देवा परिवसंति ? गोयमा ! आरणच्चुयाणं कप्पाणं उप्पिं जाव उड्ढं दूरं उप्पइत्ता, एत्थ णं हेट्ठिमगेविज्जगाणं देवाणं तओ गेविज्जगविमाण पत्थडा पण्णत्ता, पाईणपडीणायया उदीणदाहिणविच्छिन्ना पडिपुण्णचंदसंठाणसंठिया अच्चिमालीभासरासिवण्णाभा, सेसं जहा बंभलोगे जाव पडिरूवा, तत्थ णं हेट्ठिमगेविज्जगाणं देवाणं एक्कारसुत्तरे विमाणावाससए भवंतीति मक्खायं, ते णं विमाणा सव्वरयणा मया जाव पडिरूवा एत्थ णं हेट्ठिमगेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता, तिसु वि लोगस्स असंखेज्जइभागे, बहवे हेट्ठिमगेविज्जगा देवा परिवसंति, सव्वे समिड्ढिया, सव्वे समज्जुइया, सव्वे समजसा, सव्वे समबला, सव्वे समाणुभावा, महासुक्खा, अणिंदा, अपेस्सा, अपुरोहिया, अहमिंदा नामं, ते देवगणा पण्णत्ता समणाउसो ! कहि णं भंते ! मज्झिमगेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ? कहि णं भंते ! मज्झिमगेविज्जगा देवा परिवसंति ? गोयमा ! हेट्ठिमगेविज्जगाणं उप्पिं सपक्खिं सपडिदिसिं जाव

सप्तपर्णावतंसक, चम्पकावतंसक और आम्रावतंसक हैं और मध्य में प्राणतावतंसक है।

आरण-अच्युत कल्प में पूर्वादि दिशाओं में अंकावतंसक, स्फटिकावतंसक, रत्नावतंसक और जातरूपावतंसक हैं, मध्य में अच्युतावतंसक है ॥२७॥

वतंसक, चंपकावतंसक, अने आम्रावतंसक छे अने अंध्यमा प्राणुतावतंसक छे.

आरणु-अच्युतकल्पमा पूर्वादि दिशाओमा अंकावतंसक, स्फटिकावतंसक रत्नावतंसक, अने जातरूपावतंसक छे. मध्यमां अच्युतावतंसक छे. ॥ २७ ॥

उप्पइत्ता, एत्थ णं मज्झिमगेविज्जगदेवाणं तओ गेविज्जगाणं पत्थडा पण्णत्ता, पाईणपडीणायया जहा हेट्ठिमगेविज्जगाणं, नवरं सदुत्तरे विमाणावाससए भवंतीति मक्खायं, ते णं विमाणा जाव पडिरूवा, एत्थ णं मज्झिमगेविज्जगाणं जाव तिसु वि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे मज्झिमगेविज्जगदेवा परिवसंति, जाव अहमिंदा नाम ते देवगणा पण्णत्ता समणाउसो ! कहि णं भंते ! उवरिमगेविज्जएदेवा परिवसंति? गोयमा! मज्झिमगेविज्जगाणं उप्पिं जाव उप्पइत्ता, एत्थ णं उवरिमगेविज्जगाणं तओ गेविज्झगविमाणपत्थडा पण्णत्ता ?, पाईणपडीणायया, सेसं जहा हेट्ठिमगेविज्जगाणं, नवरं एगे विमाणावाससए भवंतीति मक्खायं, सेसं तहेव भाणियव्वं जाव अहमिंदा नामं ते देवगणा पण्णत्ता समणाउसो ! एक्कारसुत्तरं हेट्ठिमेसु सत्तुत्तरं च मज्झिमए, सयमेगं उवरिमए पंचेव अणुत्तरविमाणा ॥१४९॥ कहि णं भंते ! अणुत्तरोववाइयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता? कहि णं भंते ! अणुत्तरोववाइया देवा परिवसंति ? गोयमा ! इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरियगहगणनक्खत्ततारारूवाणं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं बहुगाओ जोयणकोडीओ बहुगाओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता सोहम्मीसाणसणंकुमार जाव आरणअच्चुयकप्पा तिन्नि अट्ठारसुत्तरे गेविज्जगविमाणावाससए वीइवइत्ता तेण परं दूरं गया, नीरया निम्मला वितिमिरा विसुद्धा पंचदिसिं पंच अणुत्तरा महइमहालया, महाविमाणा पन्नत्ता, तं जहा–विजए वेजयंते जयंते अपराजिए सव्वट्ठसिद्धे तेणं विमाणा सव्व रयणामया अच्छा, सण्हा,

लण्हा, घट्टा, मट्ठा, नीरया, निम्मला, निप्पंका, निक्कंकडच्छाया, सप्पभा, सस्सिरीया सउज्जोया, पासाईया, दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं अणुत्तरोववाइयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता, तिसु वि लोयस्स असंखेज्जइभागे, तत्थ णं बहवे अणुत्तरोववाइया देवा परिवसंति, सव्वे समिड्ढिया, सव्वे समबला, सव्वे समाणुभावा महासुक्खा, अणिंदा, अप्पेसा अपुरोहिया अहमिंदा, नामं ते देवगणा पण्णत्ता समणाउसो! ॥सू० २८॥

छाया—कुत्र खलु भदन्त ! अधस्तन ग्रैवेयकाणाम् पर्याप्तापर्याप्तानात् स्थानानि प्रज्ञप्तानि ! कुत्र खलु भदन्त ! अधस्तनग्रैवेयका देवाः परिवसन्ति ? गौतम ! आरणाच्युतयोः कल्पयोरुपरि यावत् ऊर्ध्वम् दूरम् उत्पत्य अत्र खलु अधस्तनग्रैवेयकाणां देवानां त्रयो ग्रैवेयकविमानप्रस्तटाः प्रज्ञप्ताः, प्राचीन प्रतीचीनायताः उदीचीन दक्षिण विस्तीर्णाः प्रतिपूर्णचन्द्र संस्थानसंस्थिताः, अर्चि-

ग्रैवेयकादि स्थानों की वक्तव्यता

शब्दार्थ-(कहि णं भंते ! हिट्ठिमगेविज्जगाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) हे भगवन् अधस्तन पर्याप्त-अपर्याप्त ग्रैवेयक देवों के स्थान कहाँ कहे हैं? (कहि णं भंते ! हिट्ठिमगेविज्जगा देवा परिवसंति ?) हे भगवन् ! अधस्तन ग्रैवेयकदेव कहां निवास करते हैं ? (गोयमा) हे गौतम ! (आरणच्चुयाणं कप्पाणं उप्पिं) आरण-अच्युत कल्पों के ऊपर (जाव) यावत् (उड्ढं) ऊपर (दूरं) दूर (उप्पइत्ता) जाकर (एत्थणं) यहां (हिट्ठिमगेविज्जगाणं देवाणं) अधस्तन ग्रैवेयक देवों के (तओ) तीन (गेविज्जग विमाणपत्थडा) ग्रैवेयक विमानों के प्रस्तट-पाथडे

ગ્રૈવેયકાદિસ્થાનોની વક્તવ્યતા

શબ્દાર્થ-(कहि णं भंते ! हिट्ठिम गेविज्जगाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) હે ભગવન્ ! અધસ્તન પર્યાપ્ત-અપર્યાપ્ત ગ્રૈવેયક દેવોના સ્થાન કયાં કહ્યાં છે? (कहि णं भंते ! हिट्ठिमगेविज्जगा देवा परिवसंति ?) હે ભગવન્ ! અધસ્તન ગ્રૈવેયક દેવ કયાં નિવાસ કરે છે ? (गोयमा ?) હે ગૌતમ ! (आरणच्चुयाणं कप्पाणं उप्पिं) આરણ-અચ્યુત કલ્પના ઊપર (जाव) यावत् (उड्ढं) ઊપર (दूरं) દૂર (उप्पइत्ता) જઈને (एत्थणं) અહિં (हिट्ठिमगेविज्जगाणं देवाणं) અધસ્તન ગ્રૈવેયક દેવોના (तओ) ત્રણ (गेविज्जगविमाणपत्थडा) ગ્રૈવેયક વિમાનોના પ્રસ્તર-પરથાર

र्मालाभासराशिवर्णाभाः, शेषं यथा ब्रह्मलोके यावत् प्रतिरूपाः, तत्र खलु अधस्तन ग्रैवेयकाणां देवानाम् एकादशोत्तरम् विमानावासशतं भवति इत्याख्यातं, तानि खलु विमानानि सर्वरत्नमयानि यावत् प्रतिरूपाणि, अत्र खलु अधस्तनग्रैवेयकाणाम् देवानां पर्याप्तापर्याप्तानाम् स्थानानि प्रज्ञप्तानि, त्रिष्वपि लोकस्य असंख्येयभागे, तत्र खलु बहवोऽधस्तनग्रैवेयकादेवाः परिवसन्ति, सर्वे समर्द्धिकाः, सर्वे-समद्युतिकाः, सर्वे समयशसः, सर्वे समबलाः, सर्वे समानुभावा', महासौख्याः,

(पण्णत्ता) कहे हैं (पाईणपडीणायया) पूर्व-पश्चिम में लम्बे (उदीण-दाहिणवित्थिन्ना) उत्तर-दक्षिण में विस्तीर्ण (पडिपुण्णचंदसंठाणसंठिया) प्रतिपूर्ण चन्द्रमा के आकार के (अच्चिमालीभासरासिवण्णाभा) सूर्य के तेज की राशि जैसे वर्ण वाले (सेसं जहा बंभलोगे) शेष वर्णन ब्रह्मलोक कल्प के समान (जाव पडिरूवा) यावत् प्रतिरूप हैं (तत्थ णं) उनमें से (हेट्ठिमगेविज्जगाणं देवाणं) नीचे के ग्रैवेयक देवों के (एक्कारसुत्तरे विमाणावाससए) एक सौ ग्यारह विमान (भवंतीति मक्खायं) हैं, ऐसा कहा है (ते णं विमाणा) वे विमान (सव्वरयणामया) सर्वरत्नमय हैं (जाव पडिरूवा) यावत् प्रतिरूप हैं (एत्थ णं) यहां (हेट्ठिमगेविज्जगाणं देवाणं) अधस्तन ग्रैवेयक देवों के (पज्जत्ता-पज्जत्ताणं) पर्याप्तों और अपर्याप्तों के (ठाणा) स्थान (पण्णत्ता) कहे हैं (तीसु वि) तीनों अपेक्षाओं से भी (लोगस्स असंखेज्जइभागे) लोक के असंख्यातवें भाग में हैं (तत्थ णं) वहां (बहवे) बहुत-से (हेट्ठिम-गेविज्जगा देवा परिवसंति) अधस्तन ग्रैवेयक देव निवास करते हैं

(पण्णत्ता) કહ્યાં છે (पाईणपडीणायया) पूर्वपश्चिमभां લાંબાં (उदीणदाहिणवित्थिन्ना) उत्तर-दक्षिणभां विस्तीर्ण (पडिपुण्णचंदसंठाणासंठिया) प्रतिपूर्ण चन्द्रमाना आકારना (अच्चिमालीभासरासिवण्णाभा) सूर्यना तेજની રાશિ જેવા વર્ણવાળા (सेसं जहा बंभलोगे) शेष वर्णन બ્રહ્મલોક કલ્પના સમાન (जाव पडिरूवा) यावत् प्रतिરૂપ (तत्थणं) તેઓમાંથી (हेट्ठिमगेविज्जगाणं देवाणं) નીચેના ગ્રૈવેયક દેવોના (एक्कारसुत्तरे विमाणावाससए) એક સો અગીયાર વિમાન (भवंतीति मक्खायं) છે, એમ કહ્યું છે (तेणं विमाणा) તે વિમાનો (सव्वरयणामया) સર્વરત્નમય છે (जाव पडिरूवा) यावत् प्रतिરૂપ છે (एत्थणं) અહિં (हेट्ठिमगेविज्जगाणं देवाणं) અધસ્તન ગ્રૈવેયક દેવોના (पज्जत्तापज्जत्ताणं) પર્યાપ્ત અને અપર્યાપ્તોના (ठाणा) સ્થાન (पण्णत्ता) કહ્યા છે (तिसु वि) ત્રણે અપેક્ષાઓથી પણ (लोगस्स असंखेज्जइभागे) લોકના અસંખ્યાતમા ભાગમાં છે (तत्थणं) ત્યાં (बहवे) ઘણા બધા (हेट्ठिमगेविज्जगा देवा परिवसंति) અધસ્તન ગ્રૈવેયક દેવ નિવાસ કરે છે (सव्वे) તેઓ બધા (समिड्ढिया)

अनिन्द्राः, अप्रेष्याः, अपुरोहिताः, अहमिन्द्राः, नामते देवगणाः प्रज्ञप्ताः श्रमणायुष्मन् ! कुत्र खलु भदन्त ! मध्यमानां ग्रैवेयकाणाम् देवानाम् पर्याप्तापर्याप्तानाम् स्थानानि प्रज्ञप्तानि ? कुत्र खलु भदन्त ! मध्यमग्रैवेयकाः देवाः परिवसन्ति ? गौतम ! अधस्तनग्रैवेयकाणाम् उपरि सपक्षम् सप्रतिदिक्, यावत् उत्पत्य, अत्र खलु मध्यमग्रैवेयकदेवानां त्रयो ग्रैवेयकाणाम् प्रस्तटाः प्रज्ञप्ताः, प्राचीन प्रती-

(सव्वे) वे सब (समिड्ढिया) समान ऋद्धि वाले (सव्वे समज्जुइया) सब समान द्युति वाले (सव्वे समजसा) सब समान यश वाले (सव्वे समबला) सब समान बल वाले (सव्वे समाणुभावा) सब समान अनुभाव वाले (महासुक्खा) महान् सुख वाले (अणिंदा) इन्द्र रहित (अपेस्सा) प्रेष्य-दास रहित (अपुरोहिया) पुरोहित हीन (अहमिंदा) अहमिन्द्र (नामं) अव्यय (ते देवगणा पण्णत्ता समणाउसो) आयुष्मन् श्रमणो ! वे देवगण कहे गए हैं ।

(कहि णं भंते ! मज्झिमगाणं गेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) हे भगवन् पर्याप्त और अपर्याप्त मध्यम ग्रैवेयक देवों के स्थान कहां कहे हैं ? (कहि णं भंते ! मज्झिमगेविज्जगा देवा परिवसंति ?) हे भगवन् ! मध्यम ग्रैवेयक देव कहां निवास करते हैं ? (गोयमा) हे गौतम ! (हेट्ठिमगेविज्जगाणं उप्पिं) अधस्तन ग्रैवेयकों के ऊपर (सपक्खिं सपडिदिसं) समान दिशा और समान विदिशा में (जाव) यावत् (उप्पइत्ता) जाकर (एत्थ णं) यहां (मज्झिमगेविज्जग देवाणं) मध्यम ग्रैवेयक देवों के (तओ गेविज्जगाणं)

સમાન ઋદ્ધિવાળા (सव्वे समज्जुइया) બધા સમાન દ્યુતિવાળા (सव्वे समजसा) બધા સમાન યશવાળાં (सव्वे समबला) બધાં સમાન બળવાળાં છે (सव्वे समाणुभावा) બધાં સમાન અનુભવવાળાં (महासुक्खा) મહાન્ સુખવાળા (अणिंदा) ઇન્દ્ર વગરના (अपेसा) પ્રેષ્ય-દાસ વગરના (अपुरोहिया) પુરોહિત વિનાના (अहमिंदा नाम) અહમિન્દ્ર (नामं) તે (देवगणा पण्णत्ता समणाउसो) હે આયુષ્મન્ શ્રમણો આ દેવગણ કહેલા છે

(कहि णं भंते ! मज्झिमगाणं गेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) ભગવન્ ! પર્યાપ્ત અને અપર્યાપ્ત મધ્યમ ગ્રૈવેયક દેવોના સ્થાન ક્યાં કહ્યાં છે ? (कहि णं भंते ! मज्झिमगेविज्जगा देवा परिवसंति ?) હે ભગવન્ ! મધ્યમ ગ્રૈવેયક દેવ ક્યા નિવાસ કરે છે ? (गोयमा !) હે ગૌતમ (हेट्ठिमगेविज्जगाणं उप्पिं) અધસ્તન ગ્રૈવેયકોના ઉપર (सपक्खिं सपडिदिसं) સમાનદિશા અને સમાન વિદિશામા (जाव) યાવત્ (उप्पइत्ता) જઈને (एत्थणं) અહિં (मज्झिमगेविज्जगदेवाणं) મધ્યમ ગ્રૈવેયક દેવોના (तओ गेविज्जगाणं) ગ્રૈવેયકોના

चीनायता यथा अधस्तनग्रैवेयकाणाम्, नवरम् सप्तोत्तरं विमानावासशतं भवति, इत्याख्यातं, तानि खलु विमानानि यावत् प्रतिरूपाणि, अत्र खलु मध्यमग्रैवेयकाणाम् यावत् त्रिष्वपि लोकस्य असंख्येयभागे तत्र खलु बहवो मध्यमग्रैवेयका देवाः परिवसन्ति, यावत् अहमिन्द्रा नाम ते देवगणाः प्रज्ञप्ताः श्रमणायुष्मन् ! कुत्र खलु भदन्त ! उपरिमग्रैवेयकाणां देवानां पर्याप्तापर्याप्तानाम्, स्थानानि प्रज्ञप्तानि ? कुत्र खलु भदन्त ! उपरिमग्रैवेयकदेवाः परिवसन्ति ? गौतम ! मध्यमग्रैवेयका-

---

ग्रैवेयकों के तीन (पत्थडा) पाथडे (पण्णत्ता) कहे हैं (पाईणपडीणायया) पूर्व-पश्चिम में लम्बे (जहा हेट्ठिमगेविज्जगाणं) अधस्तन ग्रैवेयक के समान (नवरं) विशेष (सत्तुत्तरे विमाणावाससए) एक सौ सात विमान (भवंतीति मक्खायं) हैं, ऐसा कहा है (ते णं विमाणा जाव पडिरूवा) वे विमान यावत् प्रांतरूप हैं (एत्थ णं) यहाँ (मज्झिमगेविज्जगाणं) मध्यम ग्रैवेयकों के (जाव) यावत् (तिसु वि) तीनों अपेक्षाओं से भी (लोगस्स असंखेज्जइभागे) लोक के असंख्यातवें भाग में हैं (तत्थ णं) वहां (बहवे मज्झिमगेविज्जगा देवा परिवसंति) बहुत मध्यम ग्रैवेयक देव निवास करते हैं (जाव अहमिंदानाम) यावत् सभी अहमिन्द्र (ते देवगणा पण्णत्ता) वे देवगण कहे गए हैं (समणाउसो) हे आयुष्मन् श्रमणो ! (कहि णं भंते ! उवरिम गेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) हे भगवन् ! ऊपरी ग्रैवेयकों के पर्याप्त और अपर्याप्त देवों के स्थान कहां कहे हैं (कहि णं भंते ! उवरिमगेविज्जए देवा

ત્રણ (પત્થડા) પરથાર (પણ્ણત્તા) કહ્યાં છે (પાઈણપડીણાયયા) પૂર્વપશ્ચિમમા લાંબા (જહા હેટ્ઠિમગેવિજ્જગાણં) અધસ્તન ગ્રૈવેયકોના સમાન (નવરં) વિશેષ (સત્તુત્તરે વિમાણાવાસસએ) એકસોને સાત વિમાન (હવંતીતિ મક્ખાયં) છે એ પ્રમાણે કહેલ છે. (તેણં વિમાણા જાવ પડિરૂવા) એ વિમાનો યાવત્ પ્રતિરૂપ છે. (એત્થણં) અહીં (મજ્ઝિમગેવિજ્જગાણં) મધ્યમ ગ્રૈવેયકોના (જાવ) યાવત્ (તિસુવિ) ત્રણે અપેક્ષાઓથી પણ (લોગસ્સ અસંખેજ્જઇભાગે) લોકના અસંખ્યાત ભાગોમાં છે. (તત્થણં) ત્યા (બહવે મજ્ઝિમગેવિજ્જગા પરિવસંતિ) ઘણા મધ્યમ ગ્રેવેયક દેવો નિવાસ કરે છે, (જાવ અહમિંદા નામ) યાવત્ બધા અહમિંદ્ર છે. (તે દેવગણા પણત્તા) એ દેવગણો કહેવામાં આવેલ છે. (સમણાઉસો) હે આયુષ્યમન્ શ્રમણો

(कहि णं भंते ! उवरिमगेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता) હે ભગવન્ ! ઊપરના પર્યાપ્તક અપર્યાપ્તક ગ્રૈવેયક દેવોના સ્થાન કયાં કહેલા છે ? (कहि णं भंते ! उवरिमगेविज्जए देवा परिवसंति) હે ભગવન્ ! ઊપરના ગ્રૈવેયક દેવો

णाम् उपरि यावत् उत्पत्य अत्र खलु उपरिमग्रैवेयकाणाम् त्रयो ग्रैवेयकविमान-प्रस्तटाः प्रज्ञप्ताः, प्राचीनप्रतीचीनायताः, शेषं यथा अधस्तन ग्रैवेयकाणाम् नवरम् एकं विमानावासशतं भवति इत्याख्यातं, शेषं तथैव भणितव्यम् यावत् अहमिन्द्राः नाम ते देवगणाः प्रज्ञप्ताः श्रमणायुष्मन् ! एकादशोत्तरम् अधस्तनेषु सप्तोत्तरञ्च मध्यमके, शतमेकम् उपरिमके पञ्चैव अनुत्तरविमानानि ॥१४९॥ कुत्र खलु भदन्त ! अनुत्तरौपपातिकानाम् देवानाम् पर्याप्तापर्याप्तानाम् स्थानानि परिवसंति ?) हे भगवन् ! ऊपरी ग्रैवेयक देव कहां निवास करते हैं ? (गोयमा) हे गौतम ! (मज्झिमगेविज्जगाणं उप्पिं) मध्यम ग्रैवेयकों के ऊपर (जाव उप्पइत्ता) यावत् ऊंचे जाकर (एत्थ णं) यहां (उवरिमगेविज्जगाणं) ऊपरी ग्रैवेयकों के (तओ) तीन (गेविज्जग विमाणपत्थडा) ग्रैवेयक विमानों के पाथडे (पण्णत्ता) कहे हैं (पाईणपडीणायया) पूर्व-पश्चिम में लम्बे (सेसं जहा हेट्ठिमगेविज्जगाणं) शेष वर्णन अधस्तन ग्रैवेयकों के समान (नवरं) विशेष (एगे विमाणावाससए भवंतीति मक्खायं) एक सौ विमान हैं, ऐसा कहा है (सेसं तहेव भाणियव्वं) शेष उसी प्रकार कहना चाहिए (जाव अहमिंदा नामं ते देवगणा पण्णत्ता) यावत् वे देवाण अहमिन्द्र कहे गए हैं (समणाउसो) हे आयुष्मन् श्रमणो ! (एक्कारसुत्तरं) एक सो ग्यारह (हेट्ठिमेसु) नीचे के ग्रैवेयकों में (सत्तुत्तरं च मज्झिमए) एक सौ सात मध्यम ग्रैवेयकों में (सयमेगं उवरिमए) ऊपर में एक सौ (पंचेव अणुत्तर विमाणा) अनुत्तर विमान पांच ही हैं ।

ક્યાં નિવાસ કરે છે ? (गोयमा !) હે ગૌતમ ! (मज्झिमगेविज्जगाणं उप्पिं) મધ્યના ગ્રૈવેયક દેવોના ઉપર (जाव उप्पइत्ता) યાવત્ જઈને (एत्थ णं) અહીંયા (उवरीमगेवेज्जगाणं) ઉપરના ગ્રૈવેયક દેવોના (तओ) ત્રણ (गेविज्जगविमाणपत्थडा) ગ્રૈવેયક વિમાનોના પાથરાઓ (पण्णत्ता) કહ્યા છે. (पाईणपडिणायया) પૂર્વ પશ્ચિમ તરફ લાંબા (सेसं जहा हेट्ठिमगेविज्जगाणं) બાકીનું વર્ણન નીચેના ગ્રૈવેયકોના વર્ણન પ્રમાણે સમજી લેવું, (नवरं) વિશેષ (एगे विमाणावाससए भवंतीति मक्खायं) એક સો વિમાન છે, એમ કહ્યું છે (सेसं तहेव भाणियव्वं) શેષ એ રીતેજ કહેવું જોઇએ (जाव अहमिंदा नामं देवगणा पण्णत्ता) તે દેવગણ અહમિન્દ્ર કહેલા છે (समणाउसो) હે આયુષ્યમન્ શ્રમણો ! (एक्कारसुत्तरं) એક સો અગીયાર (हेट्ठिमेसु) નીચેના ગ્રૈવેયકોના (सत्तुत्तरं च मज्झिमए) એકસો સાત મધ્યમ ગ્રૈવેયકોમાં (सयमेगं उवरिमए) ઉપર એકસો (पंचेव अणुत्तरविमाणा) અનુત્તર વિમાન પાંચ જ છે.

प्रज्ञप्तानि ? कुत्र खलु भदन्त ! अनुत्तरौपपातिकादेवाः परिवसन्ति ? गौतम ! अस्या रत्नप्रभायाः पृथिव्याः बहु समरमणीयाद् भूमिभागात् ऊर्ध्वम्, चन्द्रसूर्य-ग्रहगणनक्षत्रतारारूपाणां बहूनि योजनशतानि, बहूनि योजनसहस्राणि, बहूनि योजनशतसहस्राणि, बहुका योजनकोटीः, बहुकाः योजनकोटिकोटीः ऊर्ध्वं दूरम् उत्पत्य सौधर्मेशानसनत्कुमारयावदारणाच्युतकल्पान् त्रीणि अष्टादशोत्तर-ग्रैवेयकविमानावासशतम् व्यतिव्रज्य तेन परं दूरं गतानि नीरजांसि निर्मलानि

(कहि णं भंते ! अणुत्तरोववाइयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) पर्याप्त और अपर्याप्त अनुत्तरौपपातिक देवों के स्थान कहां कहे हैं (कहि णं भंते ! अणुत्तरोववाइया देवा परिवसंति ?) हे भगवन् ! अनुत्तरौपपातिक देव कहां निवास करते हैं (गोयमा) हे गौतम ! (इमीसे रयणप्पभाए पुढवीए) इस रत्नप्रभा पृथ्वी के (बहु-समरमणिज्जाओ भूमिभागाओ उड्ढं) बहुत सम एवं रमणीय भूभाग से ऊपर (चंदिम-सूरिय-गहगण-नक्खत्त-तारारूवाणं) चन्द्रमा, सूर्य, ग्रहगण, नक्षत्र और ताराओं से (बहूइं जोयणाइं) बहुत सौ योजन (बहूइं जोयणसहस्साइं) बहुत हजार योजन (बहूइं जोयणसयसह-स्साइं) बहुत लाख योजन (बहुगाओ जोयणकोडीओ) बहुत करोड योजन (बहुगाओ जोयणकोडाकोडीओ) बहुत कोडाकोडी योजन (उड्ढं) ऊपर (दूरं) दूर (उप्पइत्ता) जाकर (सोहम्मीसाणसणंकुमार जाव आरणअच्चुय कप्पा) सौधर्म, ईशान, सनत्कुमार यावत् आरण अच्युत कल्प (तिन्नि अट्ठारसुत्तरे गेविज्जग विमाणावाससए) तीन

(कहि णं भंते ! अणुत्तरोववाइयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पण्णत्ता ?) પર્યાપ્ત અને અપર્યાપ્ત અનુત્તરૌપપાતિક દેવોના સ્થાન કયાં કહ્યાં છે ? (કહિ णं भंते ! अणुत्तरोववाइया देवा परिवसंति ?) હે ભગવન્ ! અનુત્તરૌપપાતિક દેવ કયાં નિવાસ કરે છે ? (गोयमा !) હે ગૌતમ ! (इमीसे रयणप्पभाए पुढवीए) આ રત્નપ્રભા પૃથ્વીના (बहु समरमणिज्जाओ भूमिभागाओ उड्ढं) ઘણી સમાન તેમજ રમણીય ભૂમિભાગના ઊપર (चंदिम, सूरिय,-गहगणनक्खत्ततारारूवाणं) ચન્દ્રમા-સૂર્ય, ગ્રહગણ, નક્ષત્ર અને તારાઓથી (बहूइं जोयणसयाइं) ઘણા સો યોજન (बहूइं जोयणसहस्साइ) ઘણા હજાર યોજન (बहुगाओ जोयणकोडीओ) ઘણા કરોડ યોજન (बहुगाओ जोयणकोडाकोडीओ) ઘણા કોડાકોડી યોજન (उड्ढं) ઊપર (दूरं) (उप्पइत्ता) દૂર જઈને (सोहम्मीसाणसाणंकुमार जाव आरण अच्चुयकप्पा) સૌધર્મ, ઇશાન. સનત્કુમાર, યાવત્, આરણ અચ્યુત કલ્પ (तिन्नि अट्ठारसुत्तरे गेविज्जगविमाणावाससए) ત્રણ સો અઢાર વિમાનોના (वीइवइत्ता)

वितिमिराणि विशुद्धानि पञ्चदिक्षु पञ्चानुत्तराणि महातिमहालयानि महाविमानानि प्रज्ञप्तानि, तद्यथा-विजयः, वैजयन्तः, जयन्तः, अपराजितः, सर्वार्थसिद्धः, तानि खलु विमानानि सर्वरत्नमयानि अच्छानि, श्लक्ष्णानि मसृणानि, घृष्टानि, मृष्टानि, नीरजांसि, निर्मलानि, निष्पङ्कानि निष्कङ्कटच्छायानि सप्रभाणि सश्रीकाणि सोद्द्योतानि, प्रासादीयानि दर्शनीयानि अभिरूपाणि प्रतिरूपाणि, अत्र खलु अनुत्तरौपपातिकानाम् देवानां पर्याप्तापर्याप्तानां स्थानानि प्रज्ञप्तानि त्रिष्वपि लोकस्य असंख्येयभागे, तत्र खलु बहवः अनुत्तरौपपातिका देवाः परिवसन्ति, सर्वे समर्द्धिकाः सर्वे समबलाः, सर्वे समानुभावाः महासौख्याः, अनिन्द्राः अप्रेष्याः अपुरोहिताः अहमिन्द्राः नाम ते देवगणाः प्रज्ञप्ताः श्रमणायुष्मन् ! । सू०२८॥

टीका—अथ पर्याप्तापर्याप्तकग्रैवेयकादि देवानां स्वस्थानादिकं प्ररूपयितुमाह-'कहि णं भंते ! हेट्ठिमगेविज्जगाणं' गौतमः पृच्छति-हे भदन्त ! कुत्र खलु-कस्मिन् प्रदेशे, अधस्तनत्रिक ग्रैवेयकाणां देवानाम् 'पज्जत्तापज्जत्ताणं' पर्याप्तापर्याप्तानाम् 'ठाणा पण्णत्ता' स्थानानि-स्थित्यपेक्षया स्वस्थानानि प्रज्ञप्तानि-

सौ अठारह विमानों का (वीइवइत्ता) पार करके (तेण परं दूरं गया) उससे आगे दूर पर (नीरया) रज से रहित (निम्मला) निर्मल (वितिमिरा) अंधकार से रहित (विसुद्धा) अत्यन्त शुद्ध (पंचदिसिं) पांच दिशाओं में (पंच) पांच (अणुत्तरा) अनुत्तर-सर्वोत्कृष्ट (महइमहालया) बहुत बडे (महाविमाणा) महाविमान (पन्नत्ता) कहे हैं (तं जहा) वे इस प्रकार (विजए) विजय (वेजयंते) वैजयन्त (जयंते) जयन्त (अपराजिए) अपराजित (सव्वट्ठसिद्धे) सर्वार्थसिद्ध-शेष शब्दार्थ पूर्ववत्॥२८॥

टीकार्थ-अब ग्रैवेयक देवों के स्वस्थान आदि की प्ररूपणा की जाती है-गौतम स्वामी ने प्रश्न किया-हे भगवन् ! पर्याप्त और अपर्याप्त अधस्तन (निचले) ग्रैवेयक देवों के स्थान किस जगह कहे हैं ?

પારકરીને (तेणं परं दूरं गया) તેની આગળ દૂર પર (नीरया) રજરહિત (निम्मला) નિર્મળ (वितिमिरा) અંધકાર રહિત (विसुद्धा) અત્યન્તશુદ્ધ (पंचदिसिं) પાંચે દિશાઓમાં (पंच) પાંચ (अणुत्तरा) અનુત્તર સર્વોત્કૃષ્ટ (महइमहालया) ઘણાંમોટા (महा विमाणा) મહા વિમાન (पण्णत्ता) કહ્યા છે (तं जहा) તેઓ આ પ્રકારે (विजए) વિજય (वेजयंते) વૈજયન્ત (जयन्ते) જયન્ત (अपराजिए) અપરાજિત (सव्वट्ठसिद्धे) સર્વાર્થસિદ્ધ શેષ શબ્દાર્થ પૂર્વવત્ ॥ ૨૮ ॥

ટીકાર્થ-હવે ગ્રૈવેયક દેવોના સ્વસ્થાન આદિની પ્રરૂપણા કરાય છે-શ્રી ગૌતમસ્વામીએ પ્રશ્ન કર્યો-ભગવન્ ! પર્યાપ્ત અને અપર્યાપ્ત અધસ્તન (નીચેના) ગ્રૈવેયક દેવોના સ્થાન કઇ જગ્યાએ કહ્યાં છે ? પ્રકારાન્તરે સ્પષ્ટતાને માટે ફરીથી

प्ररूपितानि सन्ति ! तदेव प्रकारान्तरेण विशदयितुं पृच्छति–'कहि णं भंते ! हेट्ठिमगेविज्जगादेवा परिवसंति ?' हे भदन्त ! कुत्र खलु कस्मिन् प्रदेशे, अधस्तन त्रिक ग्रैवेयकाः देवाः परिवसन्ति ! भगवान् उत्तरयति–'गोयमा !' हे गौतम ! 'आरणच्चुयाणं कप्पाणं उप्पिं जाव उड्ढं दूरं उप्पइत्ता' आरणाच्युतयोः कल्पयोः उपरि–ऊर्ध्वभागे, यावत्–बहूनि योजनानि बहूनि योजनशतानि, बहूनि योजनसहस्राणि बहूनि योजनशतसहस्राणि, बहुका योजनकोटीः, बहुका योजनकोटिकोटीः, ऊर्ध्वम्–उपरिभागे दूरम् उत्पत्य–उद्गम्य, 'एत्थ णं' अत्र खलु–उपर्युक्तस्थले 'हेट्ठिमगेविज्जागाणं देवाणं' अधस्तन त्रिकग्रैवेयकाणाम् देवानाम् 'तओ गेविज्जगविमाणपत्थडा' त्रयः–त्रिसंख्यकाः ग्रैवेयकविमान-प्रस्तटाः 'पण्णत्ता' प्रज्ञप्ताः–प्ररूपिताः सन्ति, ते च ग्रैवेयकविमान-प्रस्तटाः कीदृशा इत्याह–'पाईणपडीणायया' प्राचीनप्रतीचीनायताः–पूर्व-पश्चिमायामाः, 'उदीणदाहिणवित्थिण्णा' उदीचीनदक्षिणविस्तीर्णाः–उत्तरदक्षिण-विस्ताराः, 'पडिपुण्णचंदसंठाणसंठिया' प्रतिपूर्णचन्द्रसंस्थानसंस्थिताः, परि-पूर्णचन्द्रमण्डलाकाराः; 'अच्चिमालीभासरासिवण्णाभा' अर्चिर्माला भासराशि-

प्रकारान्तर से स्पष्टता के लिए पुनः यही प्रश्न दोहराया गया है–हे भगवन् ! निचले ग्रैवेयक देव कहां निवास करते हैं ?

श्री भगवान् उत्तर देते हैं–हे गौतम ! आरण–अच्युत कल्पों के ऊपर यावत् बहुत योजन, बहुत सौ योजन, बहुत हजार योजन, बहुत लाख योजन, बहुत करोड योजन, बहुत कोडा कोडी योजन की ऊंचाई पर दूर जाकर निचले ग्रैवेयक देवों के तीन ग्रैवेयक विमान प्रस्तट हैं। तात्पर्य यह है कि एक दूसरे के ऊपर तीन अधस्तन (निचले) ग्रैवेयक हैं, ऐसा निरूपण किया गया है। वे ग्रैवेयक विमानों के प्रस्तट पूर्व और पश्चिम में लम्बे हैं तथा उत्तर और दक्षिण में विस्तीर्ण हैं। वे पूर्ण चन्द्रमा के आकार के हैं और ज्योतियों के समूह एवं

પ્રશ્નને દુહરાવીને કહ્યો છે. હે ભગવન્ ! નિચલા ગ્રૈવેયક દેવ ક્યાં નિવાસ કરે છે ?

શ્રી ભગવાન્ ઉત્તર દે છે–હે ગૌતમ ! આરણ; અચ્યુત કલ્પોના ઊપર યાવત્ ઘણા યોજન; ઘણા સો યોજન, ઘણા હજાર યોજન, ઘણા લાખ યોજન, ઘણા કરોડ યોજન, ઘણા કોડાકોડી યોજનની ઊંચાઇ પર દૂર જઈને નિચલા ગ્રૈવેયક દેવોના ત્રણ ગ્રૈવેયક વિમાન પ્રસ્તર છે. તાત્પર્ય આ છે કે એક બીજાના ઉપર ત્રણ અધસ્તન (નિચલા) ગ્રૈવેયક છે એમ નિરૂપણ કરેલું છે. તે ગ્રૈવેયક વિમાનોના પ્રસ્તર પૂર્વ અને પશ્ચિમમાં લાંબા છે તથા ઉત્તર અને દક્ષિણમાં વિસ્તીર્ણ છે. તેઓ પૂર્ણ ચન્દ્રમાના આકારના છે અને જ્યોતિઓના સમૂહ

वर्णाभाः-अर्चिषां ज्योतिषां मालावत् भासां-प्रकाशानां राशिवच्च वर्णाभाः -वर्णकान्तिर्येषां ते अर्चिर्माला भासराशिवर्णाभाः, 'सेसं जहा बंभलोगे जाव पडिरूवा' शेषं यथा ब्रह्मलोके प्रतिपादितं तथा प्रतिपत्तव्यम् यावद्-असंख्येया योजनकोटीः असंख्येयाः योजनकोटिकोटीः आयामविष्कम्भेण, असंख्येयाः योजनकोटिकोटीः परिक्षेपेण सर्वरत्नमयाः, अच्छाः-स्वच्छाः, श्लक्ष्णाः, मसृणाः, घृष्टाः, मृष्टाः, नीरजसः, निर्मलाः, निष्पङ्काः निष्कङ्कटच्छायाः, स प्रभाः, सश्रीकाः, सोद्द्योताः, प्रासादीयाः, दर्शनीयाः, अभिरूपाः, प्रतिरूपाः, सन्ति, 'तत्थ णं' तत्र खलु-उपर्युक्तस्थले 'हेट्ठिमगेविज्जागाणं' अधस्तन त्रिक-ग्रैवेयकाणाम् 'देवाणं' देवानाम् 'एक्कारसुत्तरे विमाणावाससए' एकादशोत्तरं विमानावासशतम् भवंतीति मक्खायं' भवति इत्याख्यातं मया महावीरेण अन्यैश्च तीर्थकृद्भिः, आर्षत्वाद् 'भवन्ति' इत्यत्र बहुवचनं बोध्यम्, 'ते णं विमाणा सव्वरयणामया जाव पडिरूवा तानि खलु एकादशाधिकशतविमानानि सर्व-रत्नमयानि यावत्-अच्छानि-स्वच्छानि, श्लक्ष्णानि, मसृणानि, घृष्टानि मृष्टानि नीरजंसि निर्मलानि निष्पङ्कानि.निष्कङ्कटच्छायानि सप्रभाणि सश्रीकाणि सोद्-

---

